संस्कृत-पाठ-माला।

(संस्कृत भाषाका अध्ययन करनेका सुगम उपाय।)

षष्ठो भागः।

लेखक और प्रकाशक

श्रीपाद दामोदर सातवळेकर,
स्वाध्याय-मंडल, औंध, (जि० सातारा.)

तृतीय वार

संवत् १९८९, शके १८५४, सन १९३२

मूल्य ६ आने.

संस्कृत-पाठ-माला।

(संस्कृत भाषाका अध्ययन करनेका सुगम उपाय।)

षष्ठो भागः।

लेखक और प्रकाशक

श्रीपाद दामोदर सातवळेकर,

स्वाध्याय-मंडल, औंध, (जि० सातारा.)

तृतीय वार

संवत् १९८९, शके १८५४, सन १९३२

मूल्य ६ आने.

समास ।

संस्कृतमें "समास" का प्रकरण विशेष महत्त्व का है। इस समास विषयका प्रारंभ इस भागमें किया है। पाठक यदि इस भागका विशेष अभ्यास करेंगे, तो उनको समासोंके साथ थोडासा परिचय हो जायगा।

आगेके भागोंमें यह समास-प्रकरण क्रमशः समाप्त किया जायगा।

इस भागमें जो संस्कृतके वाक्य दिये हैं उनका विशेष अभ्यास पाठक करें, तथा फुरसत के समय उनको वारंवार पढते रहें।

ऐसा करनेसे ही अत्यंत लाभ हो सकता है।

स्वाध्यायमण्डल,
औंध (जि. सातारा)
१ ज्येष्ठ संवत् १९८९

लेखक
श्रीपाद दामोदर सातवळेकर

मुद्रक और प्रकाशक— श्रीपाद दामोदर सातवळेकर स्वाध्यायमंडल,
भारतमुद्रणालय, औंध, (जि. सातारा.)

संस्कृत-पाठ-माला ।

षष्ठ भाग ।

पाठ १

यदि आपका इस समयतकका अभ्यास ठीक हो गया है, तो निम्न लिखित सरल संस्कृत आप समझ सकते हैं—

(१)

ततो दशरथो मिथिलामुपेयिवान् । जनकश्च पूजां कल्पयित्वैनमुवाच । दिष्ट्या प्राप्तोऽसि सह वसिष्ठेन । ददामि सीतां रामायोर्मिलां लक्ष्मणाय च ।

विश्वामित्रश्चोवाच । राजन् ! सदृशो धर्मसम्बन्धो रामस्य सीतया सह । अन्यच्च यवीयसो जनकभ्रातुः कुशध्वजस्यापि सुताद्वयमस्ति । भरतशत्रुघ्नयोः पत्न्यर्थं सुताद्वयमपि योग्यम् ।

वसिष्ठेनापि तदनुमतम् । जनकस्तु प्राञ्जलिरुवाच । धन्यं मन्ये मम कुलम् । यत उभावपि मुनिपुंगवौ युवामस्माकं कुलसम्बन्धं सदृशं ज्ञापयतः ।

एकेनैवाह्ना चत्वारो राजपुत्राः चतसृणां राजपुत्रीणां पाणीन् गृह्णन्तु ।

ततः सर्वाभरणभूषितां सीतां समानीयाग्नेः पुरस्तात्संस्थाप्य राजा राममब्रवीत् ।—

'मे सुतेयं सीताऽद्य तव सहधर्मचारिणी प्रतीच्छैनां पतिव्रतां छायामिवानुगामिनीम् ।'

ततः सर्वे महर्षयः साधु साध्वित्यूचुः । लक्ष्मणं भरतं शत्रुघ्नं च तथैव क्रमेणोर्मिलया मांडव्या श्रुतकीर्त्या च सह संयोजयामासुः । ते अग्निं त्रिः परिक्रम्य भार्या ऊहतुः । अथ रात्र्यां व्यतीतायां विश्वामित्र आपृष्ट्वा रामचंद्रमुत्तरपर्वतं जगाम ।

राजा दशरथोऽपि मिथिलाधिपतिं जनकं पृष्ट्वाऽयोध्यानगरीमाशु प्रस्थितः ।

मार्गे तु क्षत्रियविमर्दनं जामदग्न्यं रामं दशरथो ददर्श । तदा दशरथः प्रांजलिर्भूत्वा ' अभयं देहि ' इति तं प्रार्थयामास ।

अनादृत्य तद्वाक्यं राममेव जामदग्न्य उवाच । पश्याद्यैव मे पराक्रमम् । रामोऽपि धनुः सज्यीकृत्योवाच । ब्राह्मणोऽसि त्वम् । तस्मात्ते प्राणं न हरामि ।

ततो जामदग्न्यो महेन्द्रपर्वतं तपश्चरणं कर्तुं गतः । रामोऽप्ययोध्यां प्राप्तः ।

पाठ २

पाठक इस पाठको बार बार पढें और कोई संदेह हुआ तो पूर्वभागमें येही वाक्य देखें। वहां येही वाक्य पदच्छेद पूर्वक दिये हैं। अब निम्नलिखित संस्कृत पाठ पढिये—

हे भारत! तस्य वेश्मनो मध्ये नातिमहत् कपाटयुक्तमज्ञातं भूम्यांश्च समं बिलं चक्रे। पुरोचनभयादेव संवृतं मुखं व्यदधात्। स अशुभधीः तस्य गृहद्वारि तु सदा वसति।

'हे नृप! ते सर्वे पांडवेयाः साऽऽयुधाः क्षपां तत्र वसन्ति स्म। दिवा वनाद्वनं मृगयां चरंति स्म च।'

हे राजन्! पुरोचनं वंचयन्तोऽविश्वस्ता विश्वस्तवदतुष्टास्तुष्टवत्परमाविस्मिता ऊषुः।

तस्मात्खनकस्तस्माद्विदुरामात्यादन्यत्र नगरवासिनो नरा एनान्नान्वबोधन्त। परिसंवत्सरोषितान्सुमनसस्तान्दृष्ट्वा विश्वस्तानिव संलक्ष्य पुरोचनो हर्षं चक्रे।

तथा पुरोचने हृष्टे अथ कौन्तेयो धर्मविद्युधिष्ठिरो भीमसेनार्जुनावुभौ यमौ च प्रोवाच।

इसको वारंवार पढनेसे पाठक सुगमताके साथ समझ सकते हैं। इसमें कोई कठिनता नहीं है। जो वाक्य नहीं समझा है वह पुनः पुनः पढने और विचार करनेसे समझमें आजायगा। यदि किसी स्थानपर संदेह हुआ तो पूर्व भाग में देख लें।

वहां येही वाक्य पदच्छेदपूर्वक दिये हैं, इसलिये उनको देख-नेसे सब संदेह निवृत्त हो सकते हैं। पाठक इसी प्रकार अपनी बुद्धि चलाते रहेंगे तो उनका प्रवेश संस्कृत भाषामें अति शीघ्र हो जायगा।

अब निम्नलिखित प्रश्नोंका उत्तर संस्कृतमें ही दीजिये—

१ दशरथः कुत्र उपेयिवान् ?
२ दशरथं दृष्ट्वा जनकः किं अवदत् ?
३ तदा विश्वामित्रः किं अब्रवीत् ?
४ राजपुत्राः कासां पाणिग्रहणं अकुर्वन् ?
५ सीतां अग्नेः पुरस्तात्संस्थाप्य राजा किं अब्रवीत्?
६ रात्र्यां व्यतीतायां विश्वामित्रः कुत्र गतः ?
७ दशरथः अपि कां नगरीं प्रस्थितः ?
८ मार्गे दशरथः कं ददर्श ?
९ तं दशरथः किं अब्रवीत् ?
१० जामदग्न्येन रामेण किं उक्तम् ?
११ तदा रामचन्द्रेण किं कृतम् ?
१२ जामदग्न्यः रामः कुत्र गतः ? किं कर्तुं गतः ?

इन प्रश्नोंके उत्तर पाठक संस्कृतमेंही दें। यदि कुछ कठि-नता प्रतीत हुई तो पूर्व पाठ देख लें। उस पाठमें प्रारंभमें जो वाक्य दिये हैं उनको देखनेसे ही इन प्रश्नोंके उत्तर स्वयं दिये जा सकते हैं।

पाठ ३

इकारान्त नपुंसकलिंगी शब्दोंके रूप निम्नलिखित रीतिसे होते हैं—

१ वारि—जल	४ वारिणे—जलके लिये
(हे) वारि—(हे) जल	५ वारिणः—जलसे
२ वारि—जलको	६ ,, —जलका
३ वारिणा—जलसे	७ वारिणि—जलमें

संस्कृत वाक्य ।

१ तत्र कूपे वारि अस्ति । २ सः वृषभः वारि तत्र पिबति । ३ अहं वारिणा स्नानं करोमि । ४ सः वारिणे कूपं गच्छति । ५ तस्मात् वारिणः सः मंडूकः अत्र आगच्छति । ६ तस्य वारिणः वर्णं पश्य ।

भाषा वाक्य ।

१ उस कूएमें जल है । २ वह बैल जल वहां पीता है । ३ मैं जलसे स्नान करता हूं । ४ वह जलके लिये कूएके पास जाता है । ५ उस जलसे वह मेंडक यहां आता है । ६ उस जलका रंग देख ।

संस्कृत वाक्य ।

तव गृहे मंचकस्य उपरि मया तव पुस्तकं स्थापितं अस्ति । तव पुत्रः अश्वं कदा आरोहति इति त्वं जानासि किम् ? शत्रून् निहत्य एव राज्यं प्राप्तुं शक्यं

अस्ति न अन्यथा। यदा उपासनेन ईश्वरस्य प्रसादः भवति तदा एव शाश्वतं सुखं भवति इति निश्चयः एव अस्ति। यदा दशरथः अयोध्यां राज्यं अकरोत् तदा तस्मिन् राष्ट्रे दुष्टः पापी चौरः वा न आसीत्। तत्र सर्वः अपि जनः सुखपूर्णः मुदितः ईश्वरभक्तः च आसीत्।

यथा मूषकः वस्त्रं खादति तथा एव अन्नं अपि खादति एव। यथा मानवः जलं पिबति तथा रसं अपि पिबति एव। सः मनुष्यः आपणं गत्वा आम्रं सदा आनयति खादति च। सः सदा एव आम्रं खादति परंतु कदाचित् अपि न पुस्तकं पठति। तस्मात् नगरात् त्वं कदा अत्र आगतः?

यः मनुष्यः इंद्रियाणि संयम्य ज्ञाननाशकं पापविचारं त्यजति सः एव महात्मा इति उच्यते। ऋषिः मंत्रविचारं करोति, मुनिः मौनं धारयति, महर्षिः तपः करोति, मनुष्यः भोजनं करोति, योगी योगं आचरति।

यदा वृक्षं कपिः आरोहति तदा त्वं किं करोषि? कपिः मनुष्यवत् एव सर्वं व्यवहारं करोति, परंतु सः पठनं, मननं, विचारं च कर्तुं न समर्थः भवति।

वारिधौ क्षारं जलं भवति, कूपे मधुरं जलं भवति। नदीजलं कदाचित् क्षारं कदाचित् मधुरं अपि भवति।

पाठ ४

मम कूपस्य जलं अतीव मधुरं अस्ति, न तथा तव कूपस्य। पुण्यकर्मकर्ता जनः स्वर्गं गच्छति न तथा पापकर्मकर्ता मनुष्यः। अतः त्वं धर्मस्य एव आचरणं कुरु। कदाचित् अपि धर्मस्य विरोधकं पापं न कुरु।

तव गुरोः गृहं कुत्र अस्ति कदा च सः तत्र भवति? मम गुरोः गृहं पुण्यनगरे संस्कृतपाठशालासमीपं एव अस्ति। स तत्र प्रातः सायं च भवति एव। दिवसस्य मध्यसमये न भवति। संस्कृतपाठशालां गत्वा शिष्यान् व्याकरणं पाठयति।

यदा मनुष्यः प्राणं धनं च त्यक्त्वा स्वराष्ट्रार्थं युद्धं करोति, तदा एव विजयं प्राप्नोति। सर्वस्वत्यागेन विना विजयः अशक्यः एव अस्ति।

युद्धसमये दुन्दुभिः शब्दं करोति, सैनिकः धावति, वीरः शस्त्रं गृहीत्वा अग्रे भवति। एवं सर्वत्र वीर्यं शौर्यं च भवति। तेन विजयः भवति।

ये वाक्य पाठक पढें और इस प्रकार अनेक वाक्य करते रहें। यह अच्छा होगा यदि पाठक विविध वाक्य बनाकर कागजपर लिखते रहेंगे। जो जो शब्द आगये हैं उनका उपयोग करके अनेकानेक वाक्य बनानेसे संस्कृतमें अति शीघ्र गति हो सकती है।

संस्कृत वाक्य ।

१ अथ वृद्धस्य राज्ञः दशरथस्य एषा मतिः बभूव, यत् जीवति मयि रामः कथं राजा स्यात् । २ तं च समुदितैः गुणैः युक्तं समीक्ष्य, सचिवैः सार्धं निश्चित्य च, तस्य यौवराज्यं अमन्यत । ३ नानानागरिकान् पृथक् जानपदान् अपि समानिनाय । ४ ततः सर्वां परिषदं आमन्त्र्य वसुधाधिपः उवाच । ५ कृत्स्नस्य लोकस्य हितं चरत एव मम इदं शरीरं जरितं, अतः विश्रांतिं अभिरोचये ।

भाषा वाक्य ।

१ अब वृद्ध राजा दशरथकी यह बुद्धि हुई, कि (जीवति मयि) मेरे जीवित रहते हुए ही राम कैसे राजा होवे ? २ उस को श्रेष्ठ गुणोंसे युक्त देखकर और मंत्रियोंके साथ निश्चय कर, उसके यौवराज्यका निश्चय किया । ३ नाना प्रकारके नागरिक और पृथक् पृथक् (जानपदान्) देशोंके जन (अपि) भी (समानिनाय) बुलाये । ४ पश्चात् सब (परिषदं) सभाको आमंत्रण देकर (वसुधा-अधिपः) राजा बोला । ५ (कृत्स्न) सब लोगोंका हित करते हुए ही मेरा यह शरीर (जरितं) बुड्ढा हो गया, इसलिये विश्रांति लेना (अभिरोचये) चाहता हूं ।

पाठ ५

१ श्रेष्ठः हि मम आत्मजः सर्वैः गुणैः । प्रातः यौवराज्ये तं नियोक्ता अस्मि, तद् अनुमन्यताम् । २ ते अपि तं ऊचुः । नृपते ! ते सुतस्य बहवः कल्याण-गुणाः । धर्मज्ञः सत्यसंधः शीलवान् अनसूयकः हि असौ । ३ विजितेन्द्रियः अपि सन् स्वजनवत् पौरान् नित्यं कुशलं पृच्छति । ४ नास्ति तस्य प्रसादः क्रोधश्च कदाचन निरर्थकः । ५ तस्मात् सर्वशत्रुदमनं इमं यौवराज्यस्थं वयं अपि द्रष्टुं इच्छामः ।

भाषा वाक्य ।

१ श्रेष्ठ ही है मेरा (आत्म-जः) पुत्र सब गुणोंसे । प्रातः-काल यौवराज्य में उसको नियुक्त करनेवाला हूं, उसके लिये अनुमति दें । २ वे भी उसे बोले । हे राजा ! तेरे (सुतस्य) पुत्रके बहुत कल्याणमय गुण हैं । (असौ) यह धर्म जानने वाला, सत्य (संध) प्रतिज्ञा करने वाला, शीलवान् तथा (अन्-असूयकः) अनिंदक है । ३ जितेन्द्रिय (सन्) होता हुआ भी, अपने जनोंके समान (पौरान्) पुरवासियोंसे नित्य कुशल पूछता है । ४ नहीं है उसकी (प्रसादः) प्रसन्नता और क्रोध (कदाचन) कभी भी निरर्थक । ५ इस लिये हम भी सब शत्रुओंका दमन करनेवाले इस रामको यौवराज्य पर (स्थं) बैठा हुआ देखना चाहते हैं ।

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

संस्कृत वाक्य ।

६ तदा राजा दशरथः प्रत्युवाच । ७ अहो ! प्रीतः अस्मि । रामस्य यौवराज्याय सर्वं एव उपकल्पताम् ! ८ भोः सुमंत्र ! अत्र रामः शीघ्रं आनीयताम् । ९ सः अपि तथा इति उक्त्वा रामं तत्र आनयांचक्रे । १० राम प्रांजलिः प्रणतः पितुः अंतिके अभि प्रेत्य स्वं नाम श्रावितवान् । ११ पितुः चरणौ च ववंदे । तदा राजा तं इदं वचः उवाच ! १२ सदृश्यां पत्न्यां उत्पन्नः गुणज्येष्ठः आत्मजः असि, तस्मात यौवराज्यं अवाप्नुहि । १३ हे पुत्र ! ते स्नेहात् हितं वक्ष्यामि ।

भाषा वाक्य ।

६ तब राजा दशरथ उत्तर देने लगा । ७ अहो ! मैं संतुष्ट हूं । राम के यौवराज्य के लिये सब ही सिद्धता होवे । ८ हे सुमंत्र ! यहां रामको लाओ । ९ उसने भी ठीक ऐसा कह-कर रामको वहां लाया । १० रामने (प्रांजलिः) हाथ जोड (प्र-नतः) नम्रभावसे (पितुः) पिताके (अंतिके) पास (अभिप्रेत्य) जा कर अपना नाम (श्रावितवान्) सुनाया । ११ पिताके चरणों की वन्दना की । तब राजा उसे यह वचन बोला । १२ तू सदृश धर्मपत्नीमें उत्पन्न, गुणोंसे श्रेष्ठ पुत्र है, इस लिये यौवराज्यको प्राप्त हो । १३ हे पुत्र ! तेरे स्नेहसे कल्याणका उपदेश कहता हूं ।

पाठ ६

संस्कृत वाक्य ।

जितेन्द्रियः भव । कामक्रोधसमुत्थितानि व्यसनानि त्यजस्व । यः परोक्षया तथा प्रत्यक्षया अपि वृत्त्या मेदिनीं पालयति, तस्य मित्राणि नन्दन्ति ।

भाषा वाक्य ।

जितेंद्रिय हो । काम और क्रोधसे उत्पन्न व्यसन छोड दे । जो अप्रत्यक्ष तथा प्रत्यक्ष (वृत्त्या) वृत्तिसे (मेदिनीं) पृथिवीका पालन करता है, उसके मित्र आनंदित होते हैं ।

समास ।

संस्कृत में दो अथवा अधिक शब्द इकठे होकर समास बनते हैं और इनमें विशेष अर्थ होता है । इसको समझनेकी पद्धति यह है—

१ नृपतिः=नृणां पतिः नृपतिः (मनुष्योंका पति राजा; नरपति, नरेश) २ धर्मज्ञः-धर्मं जानाति इति (धर्मको जो जानता है, धर्मज्ञानी) ३ सर्वशत्रुदमनः-सर्वशत्रूणां दमनः नाशकः (सब शत्रुओंका नाशक)

४ गुणज्येष्ठः-गुणैः ज्येष्ठः (गुणोंसे श्रेष्ठ)

इस रीतिसे पाठक समासों की ओर देखें और उनको समझनेका यत्न करें । यहां जैसा समासोंको संस्कृतमें ही खोलकर बताया है उसी प्रकार आगेभी बताया जायगा ।

यदा निवृत्ता राजानो धनुषः सज्यकर्मणः ।
अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ १ ॥

अन्वयः- यदा राजानः धनुषः सज्यकर्मणः निवृत्ताः अथ विप्राणां मध्यात् उदारधीः जिष्णुः उदतिष्ठत ।

अर्थ—जब राजे धनुष्य को सज्य करनेके कर्मसे निवृत्त हुए, तब विप्रोंके बीचमें से उदार बुद्धिवाला (जिष्णुः) अर्जुन उठा । म. भा. आदि. अ. १९०

उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजिनानि च ।
दृष्ट्वा संप्रस्थितं पार्थमिन्द्रकेतुसमप्रभम् ॥ २ ॥

अन्वयः—इन्द्रकेतुसमप्रभं पार्थं संप्रस्थितं दृष्ट्वा विप्रमुख्याः अजिनानि विधुन्वन्तः उदक्रोशन् ।

अर्थ— (इंद्रकेतु) बादलसमान तेजस्वी अर्जुनको (संप्रस्थितं) जाते देखकर मुख्य ब्राह्मण (अजिनानि) चर्म (विधुन्वन्तः) कंपाते हुए (उदक्रोशन्) कोलाहल मचाने लगे ।

केचिदासन्विमनसः केचिदासन्मुदान्विताः ।
आहुः परस्परं केचिन्निपुणा बुद्धिजीविनः ॥ ३ ॥

अन्वय— केचित् विमनसः आसन्, केचित् मुदान्विताः आसन् केचित् निपुणाः बुद्धिजीविनः परस्परं आहुः ।

अर्थ—कोई कोई (विमनसः) दुःखी (आसन्) हुए, (केचित्) कोई (मुदा–अन्विताः) आनंदयुक्त हुए, कोई निपुणतायुक्त बुद्धिजीवी विप्र परस्पर बोलने लगे ।

पाठ ७

(म० भा० आदि. अ० १९०)

यत्कर्णशल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः ।
नानतं बलवद्भिर्हि धनुर्वेदपरायणैः ॥ ४ ॥
तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा ।
बटुमात्रेण शक्यं हि सज्यं कर्तुं धनुर्द्विजाः ॥ ५ ॥

अन्वयः— यत् कर्णशल्यप्रमुखैः लोकविश्रुतैःधनुर्वेदपरायणैः बलवद्भिः क्षत्रियैः न आनतं, हे द्विजाः ! तत् धनुः हि कथं अकृतास्त्रेण,प्राणतः दुर्बलीयसा बटुमात्रेण तु सज्यं कर्तुं शक्यम्?

अर्थ— जो कर्ण शल्य आदि लोकप्रसिद्ध धनुर्वेदप्रवीण बलवान् क्षत्रियोंने नहीं (आनतं) नमाया, हे द्विजो ! वह धनु कैसे (अकृत-अस्त्रेण) जिसने अस्त्रमें परिश्रम किया नहीं, ऐसे शक्तिसे ही दुर्बल (बटुमात्रेण) बालक ने ही सज्य करनेके लिये शक्य है ?

अवहास्या भविष्यन्ति ब्राह्मणाः सर्वराजसु ।
कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते ॥ ६ ॥

अन्वयः— चापलात् अपरीक्षिते अस्मिन् कर्मणि असंसिद्धे सर्वराजसु ब्राह्मणाः अवहास्थाः भविष्यन्ति ।

अर्थ— चपलतासे (अपरीक्षिते) अनजाने इस कर्ममें (असंसिद्धे) सिद्धि न मिलनेपर सब राजाओंमें ब्राह्मण हंसी

यदा निवृत्ता राजानो धनुषः सज्यकर्मणः ।
अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ १ ॥

अन्वयः– यदा राजानः धनुषः सज्यकर्मणः निवृत्ताः अथ विप्राणां मध्यात् उदारधीः जिष्णुः उदतिष्ठत ।

अर्थ—जब राजे धनुष्य को सज्य करनेके कर्मसे निवृत्त हुए, तब विप्रोंके बीचमें से उदार बुद्धिवाला (जिष्णुः) अर्जुन उठा । म. भा. आदि. अ. १९०

उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजिनानि च ।
दृष्ट्वा संप्रस्थितं पार्थमिन्द्रकेतुसमप्रभम् ॥ २ ॥

अन्वयः—इन्द्रकेतुसमप्रभं पार्थं संप्रस्थितं दृष्ट्वा विप्रमुख्याः अजिनानि विधुन्वन्तः उदक्रोशन् ।

अर्थ— (इंद्रकेतु) बादलसमान तेजस्वी अर्जुनको (संप्रस्थितं) जाते देखकर मुख्य ब्राह्मण (अजिनानि) चर्म (विधुन्वन्तः) कंपाते हुए (उदक्रोशन्) कोलाहल मचाने लगे ।

केचिदासन्विमनसः केचिदासन्मुदान्विताः ।
आहुः परस्परं केचिन्निपुणा बुद्धिजीविनः ॥ ३ ॥

अन्वय— केचित् विमनसः आसन्, केचित् मुदान्विताः आसन् केचित् निपुणाः बुद्धिजीविनः परस्परं आहुः ।

अर्थ—कोई कोई (विमनसः) दुःखी (आसन्) हुए, (केचित्) कोई (मुदा–अन्विताः) आनंदयुक्त हुए, कोई निपुणतायुक्त बुद्धिजीवी विप्र परस्पर बोलने लगे ।

पाठ ७

(म० भा० आदि. अ० १९०)

यत्कर्णशल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः ।
नानतं बलवद्भिर्हि धनुर्वेदपरायणैः ॥ ४ ॥
तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा ।
बटुमात्रेण शक्यं हि सज्यं कर्तुं धनुर्द्विजाः ॥ ५ ॥

अन्वयः– यत् कर्णशल्यप्रमुखैः लोकविश्रुतैः धनुर्वेदपरायणैः बलवद्भिः क्षत्रियैः न आनतं, हे द्विजाः ! तत् धनुः हि कथं अकृतास्त्रेण, प्राणतः दुर्बलीयसा बटुमात्रेण तु सज्यं कर्तुं शक्यम्?

अर्थ— जो कर्ण शल्य आदि लोकप्रसिद्ध धनुर्वेदप्रवीण बलवान् क्षत्रियोंने नहीं (आनतं) नमाया, हे द्विजो ! वह धनु कैसे (अकृत-अस्त्रेण) जिसने अस्त्रमें परिश्रम किया नहीं, ऐसे शक्तिसे ही दुर्बल (बटुमात्रेण) बालक ने ही सज्य करनेके लिये शक्य है ?

अवहास्या भविष्यन्ति ब्राह्मणाः सर्वराजसु ।
कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते ॥ ६ ॥

अन्वयः– चापलात् अपरीक्षिते अस्मिन् कर्मणि असंसिद्धे सर्वराजसु ब्राह्मणाः अवहास्याः भविष्यन्ति ।

अर्थ— चपलतासे (अपरीक्षिते) अनजाने इस कर्ममें (असंसिद्धे) सिद्धि न मिलनेपर सब राजाओंमें ब्राह्मण हंसी

के योग्य बन जायंगे ।

यद्येष दर्पाद्धर्षाद्वाऽप्यथ ब्राह्मणचापलात् ।
प्रस्थितो धनुरायन्तुं वार्यतां साधु मा गमत् ॥७॥

अन्वयः—यदि एषः दर्पात् हर्षात् वा अपि अथ ब्राह्मणचापलात् धनुः आयन्तुं प्रस्थितः, वार्यतां, साधु मा गमत् ।

अर्थ— यदि यह (दर्पात्) अहङ्कारसे, हर्षसे अथवा ब्राह्मणोंकी चपलतासे धनुष्य (आयन्तुं) नमानेको (प्रस्थित) जा रहा है, इसको (वार्यतां) रोको, भला न जाय ।

ब्राह्मणाः ऊचुः ।

नाऽवहास्या भविष्यामो न च लाघवमास्थिताः ।
न च विद्विष्टतां लोके गमिष्यामो महीक्षिताम् ॥८॥

अन्वयः— ब्राह्मणाः ऊचुः— अवहास्याः न भविष्यामः, लाघवं आस्थिताः च न, लोके महीक्षितां विद्विष्टतां च न गमिष्यामः ।

अर्थ—ब्राह्मण बोले कि, हम हंसने योग्य नहीं होंगे, लघुत्व को (आस्थिताः) प्राप्त नहीं होंगे, तथा लोकमें (महीक्षितां) राजोंके द्वेषको नहीं प्राप्त होंगे ।

समास ।

अब इस पाठके श्लोकोंमें आये समासोंका विवरण देखिये-

१ उदारधीः—उदारा धीः बुद्धिः यस्य सः (उदा[र] है बुद्धि जिसकी वह)

२ विप्रमुख्याः = विप्रेषु मुख्याः (ब्राह्मणोंमें मुख्य)

३ इंद्रकेतुसमप्रभः = इंद्रस्य केतुः इंद्रकेतुः मेघः। इंद्रकेतोः समा इंद्रकेतुसमा। इंद्रकेतुसमा प्रभा यस्य सः। (जिसकी प्रभा इंद्रकेतुके अर्थात् मेघके समान है)

४ बुद्धिजीविनः = बुद्धिभिः जीवन्ति इति बुद्धिजीविनः। (बुद्धिसे जीनेवाले)

५ लोकविश्रुतः = लोके विश्रुतः (लोकमें प्रसिद्ध)

६ धनुर्वेदपरायणः = धनुषः वेदः धनुर्वेदः। धनुर्वेदे परायणः धनुर्वेदपरायणः। (धनुर्वेदमें प्रवीण)

७ अपरीक्षितं=न परीक्षितं अपरीक्षितं (अनजाना हुआ)

पाठक इन समासोंका अभ्यास करें और अर्थ के अनुसार समास खोलनेका अभ्यास करें। समास यहां संस्कृत में ही खोले जाते हैं। इस अभ्याससे पाठकों की गति संस्कृत में अति शीघ्र होगी।

वाचनपाठः।

तव गुरोर्गृहं कुत्राऽस्ति? कदा च स तत्र भवति? मम गुरोर्गृहं पुण्यनगरे संस्कृत-पाठशाला-समीप-एवाऽस्ति। स तत्र प्रातः सायं च भवत्येव। दिवसस्य मध्यसमये तत्र स न भवति। संस्कृत-पाठ-शालां गत्वा शिष्यान्व्याकरणं पाठयति।

पाठ ८

पीछले चार पाठोंमें जो संस्कृत वाक्य दिये हैं, उनके संधि बनाकर यहां वाक्य दिये जाते हैं। संस्कृत श्लोकों के अन्वय के संधि भी यहां ही पाठक देखेंगे। यदि पिछले दो पाठ हो चुके हैं, तो यह पाठ विना कष्ट समझमें आ जायगा—

संस्कृत–वाचन–पाठः।

अथ वृद्धस्य राज्ञो दशरथस्यैषा मतिर्बभूव, यज्जीवति मयि रामः कथं राजा स्यात्। तं च समुदितैर्गुणैर्युक्तं समीक्ष्य, सचिवैः सार्धं निश्चित्य च, तस्य यौवराज्यममन्यत। नानानागरिकान् पृथग्जानपदानपि समानिनाय।

ततः सर्वां परिषदमामन्त्र्य वसुधाधिप उवाच। कृत्स्नस्य लोकस्य हितं चरत एव ममेदं शरीरं जरितमतो विश्रान्तिमभिरोचये। श्रेष्ठो हि ममात्मजः सर्वैर्गुणैः। प्रातर्यौवराज्ये तं नियोक्ताऽस्मि। तदनुमन्यताम्। इति।

तेऽपि तमूचुः। नृपते! ते सुतस्य बहवः कल्याणगुणाः। धर्मज्ञः सत्यसंधः शीलवाननसूयको ह्यसौ। विजितेन्द्रियोऽपि सन्स्वजनवत्पौरान् नित्यं कुशलं पृच्छति। नास्ति तस्य प्रसादः क्रोधश्च कदाचन निरर्थकः।

तस्मात्सर्वधानुद्‌गमनमिमं रामं यौवराज्यस्थं वयमपि द्रष्टुमिच्छामः । इति ।

तदा राजा दशरथः प्रत्युवाच । अहो ! प्रीतोऽस्मि । रामस्य यौवराज्याय सर्वमेवोपकल्पताम् । भोः सुमंत्र ! अत्र रामः शीघ्रमानीयताम् ।

सोऽपि तथेत्युक्त्वा रामं तत्रानयांचक्रे । रामः प्राञ्जलिः प्रणतः पितुरन्तिकेऽभिप्रेत्य स्वं नाम श्रावितवान् । पितुश्चरणौ च ववन्दे । तदा राजा तमिदं वच उवाच ।

सदृश्यां पत्न्यामुत्पन्नो गुणज्येष्ठ आत्मजोऽसि । तस्माद्यौवराज्यमवाप्नुहि । हे पुत्र ! स्नेहाद्धितं वक्ष्यामि । जितेन्द्रियो भव । कामक्रोधसमुत्थितानि व्यसनानि त्यज । यः परोक्षया तथा प्रत्यक्षयाऽपि वृत्त्या मेदिनीं पालयति, तस्य मित्राणि नन्दन्ति ।

अब श्लोकोंके पाठका संधिसमेत संस्कृत देखिये —

यदा राजानो धनुषः सज्यकर्मणो निवृत्ता, अथ विप्राणां मध्यादुदारधीर्जिष्णुरुदतिष्ठत् । इंद्रकेतुसमप्रभं पार्थं संप्रस्थितं दृष्ट्वा विप्रमुख्या अजिनानि विधुन्वन्त उदक्रोशन् ।

केचिद्विमनस आसन्, केचिन्मुदिता आसन्, केचिन्निपुणा बुद्धिजीविनः परस्परमाहुः ।

पाठ ९

यत्कर्णशल्यप्रमुखैर्लोकविश्रुतैर्धनुर्वेदपरायणैर्बलवद्भिः क्षत्रियैर्नानतं, हे द्विजाः! तद्धनुर्हि कथमकृतास्त्रेण प्राणतो दुर्बलीयसा बटुमात्रेण तु सज्यं कर्तुं शक्यम्। चापलादपरीक्षितेऽस्मिन् कर्मण्यसंसिद्धे सर्वराजसु ब्राह्मणा अवहास्या भविष्यन्ति। यद्येष दर्पाद्धर्षाद्वाऽप्यथ ब्राह्मणचापलाद्धनुरायन्तुं प्रस्थितो, वार्यतां, साधु मा गमत्।

ब्राह्मणा ऊचु– अवहास्या न भविष्यामो, लाघवमास्थिताश्च न, लोके महीक्षितां विद्विष्टतां च न गमिष्यामः।

चारों पाठोंका सरल संस्कृत यह है। इसमें संधि बना दिये हैं। पाठक दो चार बार पढेंगे तो उनके मनमें सबका अर्थ आ सकता है। तथापि किसी स्थानका अर्थ समझमें न आगया, तो वह वाक्य पिछले पाठोंमें देख सकते हैं; ऐसा करनेसे सब शंका निवृत्त हो जायगी। अब यहां कुछ सन्धि खोल कर बताते हैं—

राज्ञो दशरथस्य— राज्ञः दशरथस्य।
दशरथस्यैषा— दशरथस्य एषा।
गुणैर्युक्तं— गुणैः युक्तं।
पृथग्जानपदान्— पृथक् जानपदान्।
विजितेन्द्रियोऽपि— विजितेन्द्रियः अपि।

प्रीतोऽस्मि— प्रीतः अस्मि ।

प्रत्यक्षयाऽपि= प्रत्यक्षया अपि ।

अब संस्कृत वाक्योंके अर्थ संस्कृतमेंही देते हैं—

१ वृद्धस्य राज्ञो दशरथस्यैषा मतिर्बभूव=जरठस्य नृपतेर्दशरथस्यैषा बुद्धिः सञ्जाता ।

२ तं च समुदितैर्गुणैर्युक्तं समीक्ष्य, सचिवैः सार्धं निश्चित्य च, तस्य यौवराज्यममन्यत=तं च शोभनैः शुभगुणैर्मण्डितं दृष्ट्वा, मंत्रिभिः सह निश्चयं कृत्वा च, तस्य युवराजपदाभिषेचनममन्यत ।

३ ते सुतस्य बहवः कल्याणगुणाः= तव पुत्रस्य अनेकाः शोभना गुणाः सन्ति ।

४ अहो ! प्रीतोऽस्मि = अहो ! संतुष्टोऽस्मि ।

५ यदा राजानो धनुषः सज्यकर्मणो निवृत्ताः = यस्मिन् काले क्षत्रिया धनुष्यस्य सज्यकरणप्रयत्नात् परावृत्ताः ।

६ तदा विप्राणां मध्यादुदारधीर्जिष्णुरुदतिष्ठत् = तस्मिन् काले ब्राह्मणानां मध्यादुदारबुद्धिरर्जुन उत्थितवान् ।

पाठक ये वाक्य वारंवार पढें। संस्कृतकाही अर्थ संस्कृतमें कैसा दिया जाता है और वह कैसा सुगम होता है, यह देखें और अनुभव करें। इसको पाठक बहुत वार पढें। बहुत वार पढनेसेही बहुत लाभ होगा।

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

पाठ १०

इस पाठमें निम्नलिखित शब्द स्मरण कीजिये- ये अकारान्त पुल्लिंग शब्द हैं, इनके रूप पाठक बना सकते हैं—

शब्दार्थ ।

अंशः- भाग	कालः- समय
स्नेहः- मित्रता	अकालः- अयोग्य समय
अभ्यासः— अभ्यास	विरोधः- विरोध, झगडा
वेदः— वेद	कालज्ञः-समय जाननेवाला
जनः— मनुष्य	जलदः- मेघ, बादल
उदयः— उदय	आतपः- धूप, सूर्यकिरण
समुद्रः— सागर	क्रमः- क्रम
क्रोधः— क्रोध, गुस्सा	पराक्रमः- पराक्रम
दण्डः— दण्ड	विक्रमः- पराक्रम
कर्णः— कान	करः- हाथ

इन शब्दोंके सातों विभक्तियोंके रूप आप पूर्व बतायी रीतिसे बना सकते हैं । अब ये वाक्य पढिये—

संस्कृत वाक्य ।

सः महाबाहुः भीमः गदां गृहीत्वा युद्धाय गतः ।
(स महाबाहुर्भीमो गदां गृहीत्वा युद्धाय गतः)
वह महाबाहु भीम गदा लेकर युद्धके लिये गया ।

संस्कृत वाक्य ।

१ अयं अध्ययनस्य कालः संजातः। २ गच्छ स्वकीयं स्थानं, पुस्तकं गृहीत्वा अभ्यासं कुरु। ३ कारणं विना तेन सह विरोधं मा कुरु। ४ सः सूर्यस्य आतपे भ्रमणं करोति। ५ विक्रमयुक्तस्य क्षत्रियस्य सर्वत्र यशः भवति। ६ आकाशे इदानीं जलदः नास्ति अतः अद्य वृष्टिः न भविष्यति। ७ अद्य प्रातः सूर्यस्य यदा उदयः जातः तदा एव त्वया एतत् कर्म कृतम्। ८ दण्डेन सर्पं हन्मि। ९ समुद्रस्य जलं क्षारं भवति तथा तडागस्य जलं क्षारं न भवति। १० क्रोधं कदापि मा कुरु।

भाषा वाक्य ।

१ यह पढनेका समय हुआ है। २ जा अपने स्थानपर, पुस्तक लेकर अभ्यास कर। ३ कारणके विना उसके साथ झगडा न कर। ४ वह सूर्यकी धूपमें भ्रमण करता है। ५ पराक्रमी क्षत्रियका सर्वत्र यश होता है। ६ आकाशमें अब मेघ नहीं है इसलिये वर्षा नहीं होगी। ७ आज सवेरे सूर्यका जब उदय हुआ तबही तूने यह कर्म किया। ८ दण्डसे सापको मारता हूं। ९ सागरका जल खारा होता है, वैसा तालावका जल खारा नहीं होता है। १० गुस्सा कभी न कर।

पाठ ११

संस्कृत वाक्य।

१ स जनः यथा कर्णेन शृणोति तथा त्वं अपि शृणोषि। २ मम एव सनातनः अंशः जीवलोके जीवभूतः। ३ अस्मिन् मम सहोदरस्नेहः अस्ति एव। ४ विद्याभ्यासेन एव मनुष्यस्य उद्धारः भवितुं शक्यः न अन्यथा। ५ कालज्ञः यथाकालं पुरुषार्थं करोति। ६ धर्मज्ञस्य राज्ञः युधिष्ठिरस्य हस्तिनापुरे कदा शासनं आसीत्? ७ मन्त्रज्ञं मन्त्रिवरं आहूय राजा किं करोति? ८ यत्र गुरुः वसति तत्र अधुना गच्छ।

भाषा वाक्य।

१ वह मनुष्य जैसा कानसे सुनता है वैसा तू भी सुनता है। २ मेरा ही सनातन अंश जीवलोकमें जीव बना है। ३ इस में मेरा (सह–उदर) एक पेटसे जन्म होनेकी मित्रता है हि। ४ विद्याभ्याससे ही मनुष्य का उद्धार होना शक्य है, नहीं दूसरे प्रकारसे। ५ समय जाननेवाला योग्य कालमें पुरुषार्थ करता है। ६ धर्म जाननेवाले राजा युधिष्ठिरका (हस्तिनापुरे) देहलीमें कब राज्यशासन था? ७ विचार जाननेवाले मंत्रि· श्रेष्ठको बुलाकर राजा क्या करता है? ८ जहां गुरु रहता है वहां अब जा।

संस्कृत वाक्य ।

९ तत् भाषणं श्रुत्वा नारदप्रमुखाः सर्वे अपि मुनयः तत्र नैव स्थिताः । १० तस्य युद्धस्य अन्ते तव पुत्रः कुत्र गतः ? ११ कुलस्य यशोवर्धनः एक एव वीरः पुत्र श्रेयान् भवति न तु कुलघातिनः शतशः पुत्राः । १२ स तथा इति उक्त्वा युद्धाय प्रवृत्तः । १३ तस्मात् यज्ञात् निर्मलं यशः सर्वत्र प्रसृतम् । १४ त्वं पायसं पीत्वा पुष्टः भवसि किम्? १५ यदा चैत्रः मासः भवति तदा घर्मः अधिकः एव अस्मिन् देशे भवति । १६ यदा राजपुत्रस्य जन्म भवति तदा अत्र महान् उत्सवः भवति ।

भाषा वाक्य ।

९ वह भाषण सुनकर नारद आदि सब मुनि वहां नहीं रहे । १० उस युद्धके अंतमें तेरा पुत्र कहां गया ? ११ कुलका यश बढानेवाला एकही वीर पुत्र श्रेयस्कर होता है, परन्तु कुलघातक सैंकडों पुत्र नहीं । १२ वह ठीक ऐसा कह कर युद्धके लिये प्रवृत्त हुआ । १३ उस यज्ञसे निर्मल यश सर्वत्र फैला । १४ तू पायस पीकर पुष्ट होता है क्या ? १५ जब चैत्र महिना होता है तब गर्मी अधिकही इस देशमें होती है । १६ जब राजपुत्रका जन्म होता है तब यहां बडा उत्सव होता है ।

पाठ १२

संस्कृत-वाक्य ।

१ मंथरा तु अयोध्यां पुरीं सर्वशृङ्गारैः उद्भासितां, उच्छ्रितध्वजमालिनीं दृष्ट्वा, परं विस्मयं आगता । २ सा अदूरास्थितां धात्रीं पप्रच्छ । ३ धात्री तु हर्षेण विदीर्यमाणा इव रामस्य यौवराज्याभिषेकवृत्तान्तं मंथरायै आचचक्षे । ४ श्रुतमात्रेण तु धात्र्याः वचनेन क्षिप्रं अमर्षिता कुब्जा मंथरा । ५ क्रोधेन दह्यमाना इव पापदर्शिनी मंथरा शयानां एव कैकेयीं गत्वा इदं अब्रवीत् ।

भाषा वाक्य ।

१ मंथरा तो अयोध्या नगरीको सब (शृंगारैः) सजावटों से (उद्भासितां) तेजस्वी, (उच्छ्रित) ऊंचे किये हुए (ध्वजमालिनीं) झंडोंकी मालासे युक्त देखकर, बडे (विस्मयं) आश्चर्यको प्राप्त होगई । २ उसने समीप स्थित दाईसे (पप्रच्छ) पूछा । ३ दाई तो हर्षसे फट जानेके समान होकर रामके यौवराज्याभिषेकका वृत्तांत मंथरासे कहने लगी । ४ सुनते ही तो दाईके वचनसे (क्षिप्रं) तत्काल (अमर्षिता) क्रोधित हुई (कुब्जा) टेढी मंथरा । ५ क्रोधसे जली हुईके समान पापी मंथरा सोनेवाली कैकेयीके पास जाकर यह बोली ।

संस्कृतवाक्य ।

६ उत्तिष्ठ मूढे ! शेषे किं ? भयं अभिवर्तते त्वाम् ।
७ दशरथः यौवराज्ये रामं अभिषेक्ष्यति । सा अहं अनलेन दह्यमाना इव अस्मि, तव हितार्थं अत्र आगता । ८ हे महिषि ! कथं त्वं राजधर्माणां उग्रत्वं न अवबुध्यसे ? ९ तव भर्ता दशरथः त्वयि अनर्थकं सान्त्वं प्रयुंजानः अपि अद्य कौसल्यां अर्थेन एव योजयिष्यति । १० ते भरतं बंधुषु अपवाह्य श्वः प्रभाते रामं निष्कंटके राज्ये स्थापयिता । ११ हे कैकेयि ! सा त्वं आत्मनः हितं कुरु इदानीम् । त्रायस्व आत्मानं पुत्रं भरतं मां च ।

भाषावाक्य ।

६ ऊठ मूर्खे ! सोती है क्यों ? भय आया है तेरे प्रति ।
७ दशरथ यौवराज्यपर रामको अभिषेक करेगा । वह मैं (अनलेन) अग्निसे जली हुईके समान हुई हूं, तेरे हितके लिये यहां आई हूं । ८ हे रानी ! कैसे तू राजनीति का उग्रत्व नहीं जानती है ? ९ तेरा पति दशरथ तेरे लिये निरर्थक शांतिका भाषण (प्रयुंजानः) करनेवाला आज कौसल्याको धनसे ही संयुक्त करेगा । १० तेरे भरतको भाईयोंके पास भेजकर कल प्रातःकाल रामको निष्कंटक राज्यमें स्थापन करेगा । ११ हे कैकेयी ! वह तू अपना हित कर अब । रक्षा कर अपनी, पुत्र भरतकी और मेरी ।

पाठ १३

संस्कृतवाक्य ।

१ हर्षपूर्णा शयनात् उत्थिता कैकेयी इदं अब्रवीत् । २ मंथरे ! इदं तु मह्यं त्वया परमं प्रियं आख्यातम् । ३ न अहं रामे वा भरते वा विशेषं उपलक्षये । ४ मंथरा तु तदा दुःखिता । एनां कैकेयीं उवाच च । ५ बालिशे ! किमर्थं अस्थाने हर्षं कृतवती आसि ? शोकसागरस्य मध्यगतां अपि आत्मानं न अवबुध्यसे ? ६ सुभगा किल कौसल्या, यस्याः पुत्रः यौवराज्ये अभिषेक्ष्यते । तां एव कौसल्यां इदानीं दासीवत् त्वं उपस्थास्यसि । ७ ते पुत्रः अपि रामस्य दास्यं कुर्यात् ।

भाषावाक्य ।

१ हर्षसे परिपूर्ण होकर शयनसे उठी कैकेयी यह बोली । २ मंथरे ! यह तो मेरे लिये तूने परम प्रिय कहा । ३ नहीं मैं राममें अथवा भरतमें विशेष भेद देखती हूं । ४ मंथरा तो तब दुःखी हुई । इस कैकेयीसे बोली । ५ मूढे ! क्यों (अस्थाने) अयोग्य स्थान में हर्ष करती है ? शोकसमुद्रके मध्यमें पहुंचती हुई, अपने आपको भी नहीं जानती ? ६ भाग्यवान् निश्चयसे कौसल्या है, जिसका पुत्र यौवराज्यपर अभिषिक्त होगा । उसी कौसल्याके पास अब दासीके समान तू रहेगी । ७ तेरा पुत्र रामका दास्य करेगा ।

समास ।

अब इस पाठमें कुछ समास देखिये—

१ अदूरस्थिता-दूरे स्थिता दूरस्थिता । न दूरस्थिता अदूरस्थिता । (जो नहीं दूर खडी-समीप खडी हुई)

२ उग्रत्वं-उग्रस्य भावः उग्रत्वं । (उग्रका गुण उग्रत्व है)

३ अनर्थकं-न विद्यते अर्थः यस्मिन् तत् अनर्थकं । (जो धन देनेवाला नहीं, निरर्थक)

४ हर्षपूर्णा- हर्षेण पूर्णा । (हर्ष से परिपूर्ण)

५ अस्थानं- न स्थानं अस्थानं । (जो स्थान नहीं)

६ शोकसागरः- शोकस्य सागरः शोकसागरः । (शोकका समुद्र)

७ मध्यगता- मध्ये गता मध्यगता । (बीचमें प्राप्त)

इस प्रकार समासोंका पाठक अभ्यास करें । समास खोलनेसे उनका अर्थ शीघ्रही ध्यानमें आता है ।

संधि किये वाक्य ।

दशरथो यौवराज्ये राममभिषेक्ष्यति । साऽहमनलेन दह्यमानेवाऽस्मि, तव हितार्थमत्रागता । हे महिषि ! कथं त्वं राजधर्माणामुग्रत्वं नावबुध्यसे ? तव भर्ता दशरथस्त्वय्यनर्थकं सान्त्वं प्रयुंजानोऽप्यद्य कौसल्यामर्थेनैव योजयिष्यति ।

पाठ १४

केचिदाहुर्युवा श्रीमान्नागराजकरोपमः ।
पीनस्कन्धोरुबाहुश्च धैर्येण हिमवानिव ॥ ९ ॥
सिंहखेलगतिः श्रीमान्मत्तनागेन्द्रविक्रमः ।
संभाव्यमस्मिन्कर्मेदमुत्साहाच्चानुमीयते ॥ १० ॥

महाभारत आदि० १९०

अन्वयः— केचित् आहुः युवा, श्रीमान्, नागराजकरोपमः, पीनस्कंधोरुबाहुः, धैर्येण हिमवान् इव, सिंहखेलगतिः, श्रीमान् मत्तनागेन्द्रविक्रमः । उत्साहात् अनुमीयते, इदं कर्म अस्मिन् संभाव्यम् ।

अर्थ– कोई बोले कि यह (युवा) जवान, श्रीमान्, (नाग–राज–कर–उपमः) गजराजकी सूंडके समान, (पीन-स्कंध–ऊरु–बाहुः) विशाल गर्दन ऊरु और बाहुवाला, धैर्य-से हिमाचल जैसा, सिंहके खेलकी नाई चलनेवाला, श्रीमान्, उन्मत्त (नाग-इंद्र-विक्रमः) गजश्रेष्ठके समान विक्रमी है। इसके उत्साहसे अनुमान होता है कि यह कर्म इसमें संभवनीय है।

शक्तिरस्य महोत्साहा न ह्यशक्तः स्वयं व्रजेत् ।
न च तद्विद्यते किंचित्कर्म लोकेषु यद्भवेत् ॥ ११ ॥
ब्राह्मणानामसाध्यं च नृषु संस्थानचारिषु ।

अन्वयः–अस्य महोत्साहा शक्तिः । हि अशक्तः स्वयं न

व्रजेत् । लोकेषु तत् किंचित् कर्म न विद्यते यत् संस्थानचारिषु नृषु ब्राह्मणानां असाध्यं भवेत् ॥

अर्थ— इसकी बडी उत्साहकी शक्ति है । (हि) क्यों कि अशक्त स्वयंही नहीं जायेगा । लोकोमें वह कोई भी कर्म नहीं है कि जो (संस्थानचारिषु) संघोंमें चलनेवाले मनुष्यों में ब्राह्मणोंके लिये असाध्य हो ।

अब्भक्षा वायुभक्षाश्च फलाहारा दृढव्रताः ॥ १२ ॥
दुर्बलाः अपि विप्रा हि बलीयांसः स्वतेजसा ।
ब्राह्मणो नावमंतव्यः सदसद्वा समाचरन् ॥ १३ ॥
सुखं दुःखं महद्ध्रस्वं कर्म यत्समुपागतम् ।

अन्वयः—अब्भक्षाः, वायुभक्षाः, फलाहाराः दृढव्रताः, दुर्बलाः अपि विप्राः हि स्वतेजसा बलीयांसः । सत् असत्, सुखं दुखं, महत् न्हस्वं, यत् समुपागतं कर्म वा समाचरन् ब्राह्मणः न अवमंतव्यः ।

अर्थ—(अप्-भक्षाः) जल भक्षण करनेवाले, वायु भक्षण करनेवाले, फलभोज करनेवाले, दृढव्रती, दुर्बल भी ब्राह्मण हुआ तो भी अपने तेजसे बलवान् ही होते हैं । इस कारण भला बुरा, सुखदाई दुःखदाई, बडा छोटा जो कोई (समुपागतं) प्राप्त कर्म हो उसको (समाचरन्) करनेवाले ब्राह्मण का अव-मान नहीं करना चाहिये ।

पाठ १५

जामदग्न्येन रामेण निर्जिताः क्षत्रिया युधि ॥१४॥
पीतः समुद्रोऽगस्त्येन अगाधो ब्रह्मतेजसा ।

अन्वयः—जामदग्न्येन रामेण युधि क्षत्रियाः निर्जिताः । ब्रह्मतेजसा अगस्त्येन अगाधः समुद्रः पीतः ।

अर्थ— जमदग्निपुत्र परशुरामने युद्धमें क्षत्रियोंका (निर्जिताः) पराभव किया । ब्रह्मतेजसे तेजस्वी अगस्त्यने अगाध समुद्र (पीतः) पीया था ।

तस्मात् ब्रुवन्तु सर्वेऽत्र बटुरेष धनुर्महान् ॥१५॥
आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः ।

अन्वयः— तस्मात् सर्वे अत्र ब्रुवन्तु एष महान् बटुः धनुः शीघ्रं आरोपयतु वै । द्विजर्षभाः तथा इति ऊचुः ।

अर्थ—इसलिये सब यहां (ब्रुवन्तु) बोलें कि यह बडा युवक धनुपर शीघ्र गुण चढावे ही । ब्राह्मणश्रेष्ठोंने वैसा हो ऐसा कहा ।

एवं तेषां विलपतां विप्राणां विविधा गिरः ॥१६॥
अर्जुनो धनुषोऽभ्याशे तस्थौ गिरिरिवाचलः ।

अन्वयः— विविधाः गिरः एवं विलपतां तेषां विप्राणां अर्जुनः धनुषः अभ्याशे गिरिः इव अचलः तस्थौ ।

अर्थ—विविध (गिरः) भाषण इस प्रकार (विलपतां) बोलनेवाले उन ब्राह्मणोंके बीचमेंसे अर्जुन धनुष्यके निकट

(गिरिः) पर्वतके समान (अ-चलः) स्थिर (तस्थौ) खडा हुआ।

समास।

इस पाठमें आये हुए समासोंका परिचय अब किया जाता है-

१ नागराजकरोपमः= नागानां राजा नागराजः। नागराजस्य करः नागराजकरः। नागराजकरस्य उपमा यस्य सः नागराजकरोपमः। (हाथियोंमेंसे श्रेष्ठ हाथीकी सूंडकी उपमा है जिसको)

२ पीनस्कंधोरुबाहुः-स्कंधः च ऊरू च बाहू च स्कंधोरुबाहवः। पीनाः स्कंधोरुबाहवः यस्य सः पीनस्कंधोरुबाहुः।— (जिसके कंधे, ऊरु और बाहु विशाल हैं।)

३ मत्तनागेंद्रविक्रमः- नागानां इंद्रः नागेन्द्रः। मत्तः च असौ नागेन्द्रः च मत्तनागेन्द्रः। मत्तनागेन्द्रस्य विक्रमः इव विक्रमः यस्य। (उन्मत्त गजराज के समान विक्रमी)

४ अशक्तः— न शक्तः (शक्तिरहित)

५ दृढव्रतः- दृढं व्रतं यस्य सः (दृढ नियमवाला)

इस पाठके श्लोकोंमें कई और भी समास हैं। सब यहां दिये नहीं हैं। जो दिये हैं उनको ही वारंवार पाठक पढें। वारंवार पढनेसे ही समासका तत्त्व समझनेका ज्ञान प्राप्त हो सकता है। इस लिये समासका विवरण जो संस्कृतमें दिया है उसको पाठक वारंवार पढें।

पाठ १६

गत दो पाठोंमें जो संस्कृत वाक्य दिये हैं उनके संधि बनाकर सरल संस्कृत वाक्य इस पाठमें देते हैं—

संस्कृत—वाचन—पाठः ।

(१)

मंथरा त्वयोध्यां पुरीं सर्वश्रृंगारैरुद्भासिताम्रुच्छ्रित-ध्वजमालिनीं दृष्ट्वा परं विस्मयमागता। साऽदूरस्थितां धात्रीं पप्रच्छ। धात्री तु हर्षेण विदीर्यमाणेव रामस्य यौवराज्याभिषेकवृत्तान्तं मंथराया आचचक्षे। श्रुत-मात्रेण तु धात्र्या वचनेन क्षिप्रममर्षिता कुब्जा मंथरा। क्रोधेन दह्यमानेव मंथरा पापदर्शिनी शयानामेव कैकेयीं गत्वेदानीमिदमब्रवीत् ।

उत्तिष्ठ मूढे ! शेषे किम् ? भयमभिवर्तते त्वाम् । दशरथो यौवराज्ये राममभिषेक्ष्यति । साऽहमनलेन दह्यमानेवास्मि । तव हितार्थमभ्यागता । हे महिषि ! कथं त्वं राजधर्माणामुग्रत्वं नावबुध्यसे ? तव भर्ता दशरथस्त्वय्यनर्थकं सान्त्वं प्रयुंजानोऽद्यव कौस-ल्यामर्थेनैव योजयिष्यति । ते भरतं बंधुष्वपनाह्य श्वः प्रभाते रामं निष्कंटके राज्ये स्थापयिता ।

हे कैकेयि ! सा त्वमात्मनो हितं कुर्विदानीम् । त्रायस्वात्मानं पुत्रं भरतं मां च । हर्षपूर्णा शयना-

दुत्थिता कैकेयीदमब्रवीत्। मंथरे! इदं तु मह्यं त्वया परमं प्रियमाख्यातम्। नाहं रामे वा भरते वा विशेषमुपलक्षये।

मंथरा तु तदा दुःखिता। एनां कैकेयीमुवाच च। बालिशे! किमर्थमस्थाने हर्षं कृतवत्यसि? शोकसागरस्य मध्यगतामप्यात्मानं नावबुध्यसे। सुभगा किल कौसल्या, यस्याः पुत्रो यौवराज्येऽभिषेक्ष्यते। तामेव कौसल्यामिदानीं दासीवत्त्वमुपस्थास्यसि। ते पुत्रोऽपि रामस्य दास्यं कुर्यात्।

(२)

अब पूर्व पाठके श्लोकोंके अन्वयका संधियुक्त संस्कृत देखिये—

केचिदाहुर्युवा श्रीमान्नागराजकरोपमः पीनस्कंधोरुबाहुर्धैर्येण हिमवानिव सिंहखेलगतिर्मत्तनागेन्द्रविक्रमः। उत्साहादनुमीयत, इदं कर्माऽस्मिन्संभाव्यम्।

अस्य महोत्साहा शक्तिः। त्वशक्तः स्वयं न व्रजेत्। लोकेषु तत्किंचित्कर्म न विद्यते यत्संस्थानचारिषु नृषु ब्राह्मणानामसाध्यं भवेत्।

अब्भक्षा वायुभक्षाः फलाहारा दृढव्रता दुर्बला अपि विप्रा हि स्वतेजसा बलीयांसः। सदसत् सुखं दुःखं महद्दुःखं यत्समुपागतं कर्म वा समाचरन् ब्राह्मणो नावमंतव्यः।

पाठ १७

जामदग्न्येन रामेण युधि क्षत्रिया निर्जिताः। ब्रह्मतेजसाऽगस्त्येनागाधः समुद्रः पीतस्तस्मात्सर्वेऽत्र ब्रुवन्त्वेष महान्बटुर्धनुः शीघ्रमारोपयतु वै। द्विजर्षभास्तथेत्यूचुः।

विविधा गिर एवं विलपतां तेषां विप्राणामर्जुनो धनुष अभ्याशे गिरिरिवाचलस्तस्थौ।

पूर्व स्थानके पाठोंका सरल संस्कृत यह है। इसमें संधि किये गये हैं। पाठक दोचार बार पढेंगे तो उनको यह भी समझमें आ जायगा। यदि किसी स्थानपर समझमें नहीं आया तो वे उस वाक्य को पूर्व पाठोंमें देखकर उसका अर्थ जान सकते हैं। अब थोडेसे संधि खोलकर बताये जाते हैं—

शृंगारैरुद्भासिता = शृंगारैः उद्भासिता।

दह्यमानेव = दह्यमाना इव।

गत्वेदानीं = गत्वा इदानीं।

त्वय्यनर्थकं= त्वयि अनर्थकं।

बंधुष्वपवाह्य= बंधुषु अपवाह्य।

कैकेयीदमब्रवीत् = कैकेयी इदं अब्रवीत्।

कृतवत्यसि = कृतवती असि।

केचिदाहुः = केचित् आहुः।

अब कुछ संस्कृत वाक्योंका अर्थ संस्कृतमेंही दिया जाता है-

संस्कृत वाक्योंका संस्कृतमें अर्थ ।

१ साऽदूरस्थितां धात्रीं पप्रच्छ = सा समीपस्थां उपमातरं अपृच्छत् ।

२ उत्तिष्ठ मूढे = उत्तिष्ठ मूर्खे ।

३ साहमनलेन दह्यमानेवास्मि = सा अहं अग्निना ज्वलिता इव अस्मि ।

४ सा त्वमात्मनो हितं कुर्विदानीं = सा त्वं स्वकीयं मंगलं विधेहि अधुना ।

५ इदं तु मह्यं त्वया परमं प्रियमाख्यातं = एतत् तु मह्यं त्वया अत्यन्तं प्रीतिकरं कथितम् ।

६ शोकसागरस्य मध्यगतामप्यात्मानं नावबुध्यसे = दुःखसमुद्रस्य अंतर्गतां अपि आत्मानं न जानासि ।

७ ते पुत्रोऽपि रामस्य दास्यं कुर्यात् = तव सुतः अपि रामचंद्रस्य सेवां कुर्यात् ।

इस प्रकार संस्कृतका अर्थ संस्कृतमें करनेसे आपका संस्कृत के साथ परिचय बहुत ही बढ जायगा । इसलिये पाठक इसको वारंवार पढें ।

पाठ १८

अब इस पाठमें निम्नलिखित अकारान्त पुल्लिंग शब्दोंका अभ्यास कीजिये—

व्यवहारः—व्यापार	दरिद्रः—दरिद्री, निर्धन
यवः—जौं	पुरुषः—पुरुष
उपयोगः—उपयोग	पुरुषोत्तमः—पुरुषोंमें उत्तम
अभियोगः—लगना, मुकदमा, युद्ध	प्रणयः—प्रीति, मित्रता
दिवाकरः—सूर्य	दम्भः—ढोंग
न्यासः—रखना	स्वेदः—पसीना
वत्सः—बछडा	कंटकः—कांटा
बालः—बालक	संस्कारः—संस्कार
गंधः—गंध, सुगंध	रसः—रस
स्पर्शः—स्पर्श	भेदः—भेद
संयोगः—संयोग	दीपः—दीप

अकारन्त पुल्लिंग शब्दोंके सातों विभक्तियोंके रूप बनाना पाठक जानते ही हैं। अतः वे इन शब्दोंके रूप बनाकर विविध वाक्य बना सकते हैं।

संस्कृतवाक्य ।

१ व्यवहारे कुशलः पुरुषः विजयं प्राप्नोति। २ सः दिने यवान् रात्रौ च व्रीहीन् भक्षयति। ३ यः बलस्य उपयोगं जानाति सः एव श्रेष्ठः भवति न अन्यः। ४ त्वया तेन सह किमर्थं अभियोगः कृतः ? ५ राष्ट्रस्य उद्धाराय सर्वस्वस्य न्यासः कर्तव्यः एव। ६ स बालः भूत्वा वृद्धः इव वदति । ७ तं गोवत्सं इदानीं अत्र आनय। ८ तस्य पुष्पस्य गंधः शोभनः अस्ति। ९ यदा पिता बालकं पश्यति तदा सुखी भवति। १० एष पूर्वमार्गेण सह पश्चिममार्गस्य संयोगः अस्ति। ११ दरिद्रः पुरुषः धनहीनः भवति ।

भाषावाक्य ।

१ व्यवहारमें कुशल मनुष्य विजय प्राप्त करता है। २ वह दिनमें जौं और रात्रीमें चावल खाता है। ३ जो बल-का उपयोग जानता है वही श्रेष्ठ होता है, दूसरा नहीं। ४ तूने उससे किस लिये युद्ध किया ? ५ राष्ट्रके उद्धारके लिये सर्वस्वका दान करनाहीं चाहिये। ६ वह बालक होकर भी वृद्धके समान बोलता है। ७ उस गोवत्सको अब यहां ला। ८ उस फूलका गंध उत्तम है। ९ जब पिता बालकको देखता है तब सुखी होता है। १० यह पूर्वमार्गके साथ पश्चिममार्ग का संयोग है। ११ दरिद्र मनुष्य धनहीन होता है।

पाठ १९

संस्कृत वाक्य ।

१ पुरुषस्य भाग्यं देवः न जानाति कुतः मनुष्यः ? २ पुरुषः पुरुषोत्तमस्य उपासनां करोतु । ३ दंभेन मनुष्यस्य अधःपातः भवति । ४ ग्रीष्मकाले मनुष्यस्य शरीरात् स्वेदः निःसरति । ५ यदि वृक्षस्य कंटकः पादे प्रविशति तर्हि कंटकेन एव सः बहिः निःसार्यः । ६ संस्कारेण हीनः शूद्रः । संस्कारेण एव द्विजः भवति । ७ फलानां मधुरः रसः एव पेयः । ८ भेद एव युद्धस्य मूलं अस्ति । ९ अन्धकारे दीपः एव मार्गं दर्शयति । १० अन्नस्यार्धभागं शूद्राय स ददाति ।

भाषा वाक्य ।

१ पुरुषका भाग्य देव नहीं जानता, कैसे मनुष्य जानेगा ? २ पुरुष पुरुषश्रेष्ठकी उपासना करे । ३ ढोंगसे मनुष्यका अधःपात होता है । ४ ग्रीष्म कालमें मनुष्यके शरीरसे पसीना निकलता है । ५ यदि वृक्षका कांटा पांवमें प्रवेश करता है, तो कांटेसेही वह बाहर निकालने योग्य है । ६ संस्कारसे हीन शूद्र । संस्कारसेही द्विज होता है । ७ फलोंका मधुर रसही पीने योग्य है । ८ भेदही लडाईका मूल है । ९ अंधकारमें दीपही मार्ग बताता है । १० अन्नका आधा भाग शूद्रको वह देता है ।

संस्कृत--वाचन--पाठः ।

यथा शूद्रः अन्नं खादति तथा एव इतरः जनः भोजनं करोति । गांधारी दुर्योधनं पुत्रं अजनयत् । कुंती च युधिष्ठिरं पुत्रं अजनयत् । राजा सैनिकान् दूरतः विसृज्य आश्रमं गच्छति । तस्य शब्दं श्रुत्वा राक्षसी तत्र एव आगता । पूजितः मुनिः इदं वचनं अब्रवीत् यत् सत्यं एव परमः धर्मः इति । सा कन्या तस्मिन् एव आश्रमे विद्याध्ययनादिकं समाप्य स्वगृहं आगता । तेन राज्ञा तस्मै जनाय धनं दत्तं, तत् धनं गृहीत्वा सः देशान्तरं गतः तत्र विद्याध्ययनं कर्तुम् । ज्ञानात् एव बन्धनात् मुक्तिः भवति, तथा कर्मकरणात् अपि भवति ।

संधि किये हुए वाक्य ।

यथा शूद्रोऽन्नं खादति तथैवेतरो जनो भोजनं करोति । गांधारी दुर्योधनं पुत्रमजनयत् । कुन्ती च युधिष्ठिरं पुत्रमजनयत् । राजा सैनिकान्दूरतो विसृज्याश्रमं गच्छति । तस्य शब्दं श्रुत्वा राक्षसी तत्रैवागता । पूजितो मुनिरिदं वचनमब्रवीद्यत्सत्यमेव परमो धर्म इति । सा कन्या तस्मिन्नेवाश्रमे विद्याध्ययनादिकं समाप्य स्वगृहमागता ।

पाठ २०

संस्कृत वाक्य ।

१ एवं तु उक्ता कैकेयी क्रुद्धा बभूव। अब्रवीत् च मंथराम्। रामं वनं अद्य क्षिप्रं प्रस्थापयामि। २ भरतं एव यौवराज्ये अभिषेचये। एतत् तु संपश्य केनापि उपायेन साधयेदम्। ३ पापदर्शिनी मंथरा अपि रामार्थं उपहसन्ती कैकेयीं अब्रवीत्। हन्त इदानीं पश्य यथा ते भरतः राज्यं प्राप्स्यति। ४ पुरा देवासुरयुद्धे ते पतिः देवराजस्य साहाय्यं अकरोत्। ५ तदा त्वां एव उपादाय गत आसीत्। ६ शम्बरासुरेण तत्र राजा महायुद्धं अकरोत्।

भाषा वाक्य ।

१ इस प्रकार कहने पर कैकयी क्रुद्ध होगई। और बोली मंथराको। रामको वनमें आज शीघ्र भेजूंगी। २ भरत को ही यौवराज्यपर अभिषेक करूंगी। यह तो देखकर किसी उपाय से यह सिद्ध कर। ३ पापी मंथरा भी रामके कारण उपहास करनेवाली कैकेयीसे बोली। अजी अब देख कैसा तेरा भरत राज्य प्राप्त करेगा। ४ प्राचीन समयमें देव और असुरों के युद्धमें तेरा पति देवराजकी सहाय्यता करता रहा। ५ तुझे ही लेकर गया था। ६ शंबरासुरसे वहां राजाने बडा युद्ध किया।

संस्कृतवाक्य ।

७ यदा असुरैः शस्त्रैः शकलीकृतः राजा अभवत् तदा त्वया एव तत्र रक्षितः । ८ तुष्टेन तदा तेन राज्ञा द्वौ वरौ ते दत्तौ । ९ सः च त्वया उक्तः । यदा इच्छेयं तदा गृह्णीयां इति । १० याचस्व अधुना तौ वरौ । भरतस्य अभिषेचनं रामस्य प्रव्राजनं वर्षाणि चतुर्दश, इतिरूपौ द्वौ वरौ । ११ तावता हि कालेन स्थिरो भविष्यति पुत्रः ते प्रजाभावगतस्नेहः १२ पश्चात् कैकेयी एवं प्रोत्साहिता आभरणानि मुक्त्वा क्रोधागारं प्रविश्य भूमौ एव निपतिता ।

भाषा-वाक्य ।

७ असुरोंने शस्त्रोंसे राजा जर्जरित किया तब तूने ही वहां रक्षित किया । ८ संतुष्ट हुए उस राजाने दो वर तेरे लिये दिये । ९ उसे तुमने कहा । कि जब इच्छा करूंगी तब लूंगी । १० मांग अब वे दो वर । भरतका राज्याभिषेक और रामको बाहर भेजना चौदह वर्ष, ये दो वर । ११ उतने ही समयसे स्थिर हो जायगा पुत्र तेरा प्रजाके स्नेहसे । १२ पश्चात् कैकेयी इस प्रकार प्रोत्साहित होकर आभूषण फेंक कर क्रोधागारमें प्रविष्ट हो, भूमीपरही पडी रही ।

पाठ २१

संस्कृत-वाक्य।

१ महाराजः दशरथः प्रियार्हां प्रियं आख्यातुं कैकेय्याः अंतःपुरं प्रविवेश। २ शयनोत्तमे तां न ददर्श सः। न हि तस्य तां वेलां देवी पुरा अत्यवर्तत। ३ प्रतिहारी तु कृताञ्जलिः उवाच। देव! देवी भृशं क्रुद्धा अभिद्रुता क्रोधागारम्। ४ अपापः राजा पापसंकल्पां तां कैकेयीं धरणीतले ददर्श। ५ स तां उवाच, किमर्थं भूमौ शेषे? ६ कैकेयी उवाच—प्रतिजानीष्व प्रतिज्ञां यदि कर्तुं इच्छसि।

भाषा-वाक्य।

१ महाराज दशरथ प्रियके लिये योग्य कैकेयीको प्रिय (आख्यातुं) कहनेके लिये कैकेयी के अंतःपुरमें प्रविष्ट हुआ। २ शयनके लिये उत्तम मंदिरमें उसे नहीं देखा उसने। उसके उस समय का देवी पहिले अतिक्रमण नहीं करती थी। ३ प्रतिहारी तो हाथ जोडकर बोली, हे (देव) राजा! देवी बहुत क्रोधित हुई है और (अभिद्रुता) गई है क्रोधशालामें। ४ निष्पाप राजाने पापसंकल्पा उस कैकेयी को भूमिके ऊपर पडी देखी। ५ वह उसे बोला, किसलिये भूमीपर सोती है? ६ कैकेयी बोली- (प्रतिजानीष्व) प्रतिज्ञा कर, यदि प्रतिज्ञा पूर्ण करना चाहता है।

७ अनंतरं ते व्याहरिष्यामि यथा मम अभिप्रार्थितम् । [७ पश्चात् तुझे कहूंगी जैसी मेरी इच्छा है ।]

समास ।

१ देवासुरयुद्धं= देवाः च असुराः च देवासुराः । देवासुराणां युद्धं देवासुरयुद्धं (देव और असुरोंका युद्ध)

२ देवराजः= देवानां राजा देवराजः (देवों का राजा)

३ शंबरासुरः= शंबरः च असौ असुरः च शंबरासुरः (शंबर नामक असुर)

४ क्रोधागारं = क्रोधस्य अगारं क्रोधागारं (क्रोधभवन)

५ प्रजाभावगतस्नेहः = प्रजायाः भावः प्रजाभावः । प्रजाभावे गतस्नेहः । (प्रजाभावमें प्राप्त स्नेहसे युक्त)

६ शयनोत्तमं = शयनाय उत्तमं (शयनके लिए उत्तम)

७ कृतांजलिः = कृता अंजलिः येन सः कृताञ्जलिः (हाथ जोडे हुए)

इस रीतिसे पाठक समासोंका ज्ञान प्राप्त करें ।

पाठ २२

स तद्धनुः परिक्रम्य प्रदक्षिणमथाकरोत् ॥ १७ ॥
प्रणम्य शिरसा देवमीशानं वरदं प्रभुम् ।
कृष्णं च मनसा ध्यात्वा जगृहे चार्जुनो धनुः ॥१८॥

म० भा० आदि० अ० १९०

अन्वयः- अथ सः तत् धनुः परिक्रम्य प्रदक्षिणं अकरोत् । शिरसा देवं ईशानं वरदं प्रभुं प्रणम्य । मनसा कृष्णं च ध्यात्वा अर्जुनः धनुः जगृहे ।

अर्थ—अब उसने उस धनुष्यके (परिक्रम्य) चारों ओर परिक्रमा की । शिरसे देव ईश्वर वरदाता प्रभुको प्रणाम कर और मनसे कृष्णका ध्यान करके अर्जुनने धनुष्यको (जगृहे) लिया, पकडा ।

चैलानि विव्यधुस्तत्र ब्राह्मणाश्च सहस्रशः ।
विलक्षितास्ततश्चक्रुर्हाहाकारांश्च सर्वशः ॥ २३ ॥

अन्वयः- सहस्रशः ब्राह्मणाः तत्र चैलानि विव्यधुः ततः विलक्षिताः सर्वशः हाहाकारान् च चक्रुः ।

अर्थ— सहस्रों ब्राह्मण वहां अपने (चैलानि) दुपट्टों को (विव्यधुः) उडाने लगे । उससे (विलक्षिताः) विलक्षण अर्थात् जो वैसा कर नहीं सके थे, वे सब प्रकारसे हाय हाय (चक्रुः) करने लगे ।

न्यपतंश्चात्र नभसः समन्तात्पुष्पवृष्टयः ।
शताङ्गानि च तूर्याणि वादकाः समवादयन् ॥२४॥

अन्वयः– अत्र च नभसः समन्तात् पुष्पवृष्टयः न्यपतन् । वादकाः शतांगानि च तूर्याणि समवादयन् ।

अर्थ— यहां (नभसः) आकाशसे (समन्तात्) चारों ओर से फूल की वृष्टि (न्यपतन्) पडने लगी अर्थात् हो गई । बाजेवाले सैंकडों अंगोंसे युक्त (तूर्य) ढोल आदि वाद्य (समवादयन्) बजाने लगे ।

सूतमागधसंघाश्चाऽप्यस्तुवंस्तत्र सुस्वराः ।
तं दृष्ट्वा द्रुपदः प्रीतो बभूव रिपुसूदनः ।
सह सैन्यैश्च पार्थस्य साहाय्यार्थमियेष सः ॥२५॥

अन्वयः–अत्र सूतमागधसंघाः च अपि सुस्वराः अस्तुवन् । तं दृष्ट्वा रिपुसूदनः द्रुपदः प्रीतः बभूव । सैन्यैः च सह सः पार्थस्य साहाय्यार्थं इयेष ।

अर्थ–यहां सूत और मागधोंके संघ सुस्वरसे (अस्तुवन्) स्तुति करने लगे । उसे देखकर (रिपुसूदनः) शत्रुनाशी द्रुपद (प्रीतः) संतुष्ट हुआ । सैन्योंके साथ उसने (पार्थस्य) अर्जुनकी सहायता करनेकी (इयेष) इच्छा की ।

तस्मै दित्सति कन्यां तु ब्राह्मणाय तदा नृपे ।
कोप आसीन्महीपानामालोक्यान्योन्यमन्तिकात् ।

म० भा० आदि० १९१ । १

अन्वयः— तदा तस्मै ब्राह्मणाय कन्यां दित्सति नृपे अन्योन्यं आलोक्य महीपानां क्रोधः आसीत् ।

अर्थ—तब उस ब्राह्मणको कन्या (दित्सति) दान करने की (नृपे) राजाकी इच्छा जानकर, परस्परको (आलोक्य) देखकर (मही-पानां) राजाओंका क्रोध (आसीत्) था, हो गया । अर्थात् राजे बडे क्रुद्ध हुए ।

अस्मानयमतिक्रम्य तृणीकृत्य च सङ्गतान् ।
दातुमिच्छति विप्राय द्रौपदीं योषितां वराम् ॥२॥

अन्वयः—अस्मान् संगतान् तृणीकृत्य अतिक्रम्य च अयं योषितां वरां द्रौपदीं विप्राय दातुं इच्छति ।

अर्थ— हम (संगतान्) मिले हुओंको तिनके के समान समझकर और (अतिक्रम्य च) उल्लंघन करके (अयं) यह (योषितां) स्त्रियोंमें (वरां) श्रेष्ठ द्रौपदीको (विप्राय) ब्राह्मणको देनेकी इच्छा करता है ।

अवरोप्येह वृक्षं तु फलकाले निपात्यते ।
निहन्मैनं दुरात्मानं योऽयमस्मान्न मन्यते ॥ ३ ॥

अन्वयः—इह वृक्षं अवरोप्य तु फलकाले निपात्यते । यः अस्मान् न मन्यते । एनं दुरात्मानं निहन्म ।

अर्थ—यहां वृक्षका रोपण करके फलने के कालमें (नि-पात्यते) काट रहा है । जो हमको नहीं मानता, इस दुरात्मा को (निहन्म) मार डालेंगे ।

समास ।

१ वरदः—वरं ददाति इति । (वर देनेवाला)

२ पुष्पवृष्टिः—पुष्पाणां वृष्टिः । (फूलोंकी वृष्टि)

३ शताङ्ग—शतानि अङ्गानि यस्य ।(सौ अङ्ग हैं जिसके)

४ वादकः—वादयति इति । (जो बजाता है)

५ सूतमागधसंघाः— सूताः च मागधाः च सूतमागधाः । सूतमागधानां संघाः सूतमागधसंघाः ।
(सूत और मागधोंके संघ)

६ रिपुसूदनः = रिपोः सूदनः (शत्रुका घातक)

७ महीपः = महीं पाति इति । (पृथ्वीका पालक)

८ फलकालः = फलस्य कालः । (फलका समय)

९ दुरात्मा = दुष्टः आत्मा यस्य । (दुष्ट है आत्मा जिसका)

पाठक ये समासके विवरण वारंवार पढके ठीक समझनेका यत्न करें ।

संधि किये वाक्य ।

अथ स तद्धनुः परिक्रम्य प्रदक्षिणमकरोत् । शिरसेशानं वरदं प्रभुं प्रणम्य, मनसा कृष्णं च ध्यात्वा, अर्जुनो धनुर्जगृहे । सहस्रशो ब्राह्मणास्तत्र चैलानि विव्यधुः । ततो विलक्षिताश्च सर्वशो हाहाकारांश्चक्रुः ।

पाठ २३

पूर्व तीन पाठोंमें जो संस्कृत के वाक्य दिये हैं, उनका संधियुक्त सरल संस्कृत अब दिया जाता है—

एवं तूक्ता कैकेयी क्रुद्धा बभूव। अब्रवीच्च मंथराम्। रामं वनमद्य क्षिप्रं प्रस्थापयामि। भरतमेव यौवराज्येऽभिषेचये। एतत्तु संपश्य केनोपायेन साधयेदम्।

पापदर्शिनी मंथराऽपि रामार्थमुपहसन्ती कैकेयीमब्रवीत्। हन्तेदानीं पश्य यथा ते भरतो राज्यं प्राप्स्यति।

पुरा देवासुरयुद्धे ते पतिर्देवराजस्य साहाय्यमकरोत्। तदा त्वामेवोपादाय गत आसीत्। शंबरासुरेण तत्र राजा महायुद्धमकरोत्। यदासुरैः शस्त्रैः शकलीकृतो राजाभवत्तदा त्वयैव तत्र रक्षितः। तुष्टेन तदा तेन राज्ञा द्वौ वरौ ते दत्तौ। स च त्वयोक्तः। यदेच्छेयं तदा गृह्णीयामिति। याचस्वाधुना तौ वरौ। भरतस्याभिषेचनं रामस्य प्रव्राजनं वर्षाणि चतुर्दशेतिरूपौ द्वौ वरौ। तावता हि कालेन स्थिरो भविष्यति पुत्रस्ते प्रजाभावगतस्नेहः।

पश्चात्कैकेय्येवं प्रोत्साहिताऽऽभरणानि मुक्त्वा क्रोधागारं प्रविश्य भूमावेव निपतिता।

महाराजो दशरथः प्रियार्हां प्रियमाख्यातुं कैकेय्या अंतःपुरं प्रविवेश। शयनोत्तमे तां न ददर्श सः। नहि तस्य तां वेलां देवी पुराऽत्यवर्तत।

प्रतिहारी तु कृताञ्जलिरुवाच। देव! देवी भृशं क्रुद्धा अभिद्रुता क्रोधागारम्।

अपापो राजा पापसंकल्पां तां कैकेयीं धरणीतले ददर्श। स तामुवाच। किमर्थं भूमौ शेषे?

कैकेय्युवाच- प्रतिजानीष्व प्रतिज्ञां यदि कर्तुमिच्छसि। अनन्तरं ते व्याहरिष्यामि यथा ममाभिप्रार्थितम्। इति।

अब श्लोकोंके पाठका संधियुक्त सरल संस्कृत देखिये—

अथ स तद्धनुः परिक्रम्य प्रदक्षिणमकरोत्। शिरसा देवमीशानं वरदं प्रभुं प्रणम्य मनसा कृष्णं च ध्यात्वाऽर्जुनो धनुर्जगृहे। तदा सहस्रशो ब्राह्मणास्तत्र चैलानि विव्यधुः। ततो विलक्षिताः सर्वशो हाहाकारांश्च चक्रुः।

अत्र च नभसः समन्तात्पुष्पवृष्टयो न्यपतन्। वादकाः शतांगानि च तूर्याणि समवादयन्।

अत्र सूतमागधसंघाश्चापि सुस्वरा अस्तुवन्। तं दृष्ट्वा रिपुदमनो द्रुपदः प्रीतो बभूव। सैन्यैश्च सह स पार्थस्य साहाय्यार्थमियेष।

*

पाठ २४

तदा तस्मै ब्राह्मणाय कन्यां दित्सति नृपेऽन्योन्य-मालोक्य महीपानां क्रोध आसीत । अस्मान्संगतां-स्तृणीकृत्यातिक्रम्य चायं योषितां वरां द्रौपदीं वि-प्राय दातुमिच्छति । इह वृक्षमवरोप्य तु फलकाले नि-पात्यते । योऽस्मान्न मन्यते । एनं दुरात्मानं निहन्म ।

संधि ।

अब इस पाठके कुछ संधियोंको खोल कर बताया जाता है—

अब्रवीच्च = अब्रवीत् च ।

यौवराज्येऽअभिषे०—यौवराज्ये अभिषे० ।

केनोपायेन—केन उपायेन ।

पतिर्देवराजस्य—पतिः देवराजस्य ।

त्वामेवोपादाय—त्वां एव उप+आदाय ।

यदेच्छेयं—यदा इच्छेयं ।

शयनोत्तमे—शयन+उत्तमे ।

अपापो राजा—अपापः राजा ।

कैकेय्युवाच—कैकेयी उवाच ।

अब संस्कृतका अर्थ संस्कृतमेंही दिया जाता है । इसका अभ्यास पाठक अच्छी प्रकार करें—

१ रामं वनमद्य क्षिप्रं प्रस्थापयामि = रामचन्द्रं अरण्यं अस्मिन्दिने शीघ्रं प्रेषयिष्यामि ।

२ हन्तेदानीं पश्य यथा ते भरतो राज्यं प्राप्स्यति=

शोभनं अधुना अवलोकय येन उपायेन तव भरतः राज्यं अवाप्स्यति ।

३ पुरा देवासुरयुद्धे ते पतिः देवराजस्य साहाय्यमकरोत् = पूर्वं सुरासुरसंग्रामे तव भर्ता सुरपतेः सहाय्यतां कृतवान् ।

४ तदा त्वामेवोपादाय गत आसीत् = तस्मिन् समये त्वां गृहीत्वा एव स गतवान् ।

५ तुष्टेन तदा तेन राज्ञा द्वौ वरौ ते दत्तौ = संतोषितेन तस्मिन्समये तेन भूपेन द्वौ वरौ तुभ्यं दत्तौ ।

६ मनसा कृष्णं ध्यात्वार्जुनो = धनुर्जगृहेहृदयेन वासुदेवं ध्यात्वा पार्थः धनुष्यं गृहीतवान् ।

पाठक इसका अच्छा अभ्यास करें ।

संधि किये वाक्य ।

रामचन्द्रमरण्यमस्मिन्दिने शीघ्रं प्रेषयिष्यामि । शोभनमधुनावलोकय येनोपायेन तव भरतो राज्यमवाप्स्यति । पूर्वं सुरासुरसंग्रामे तव भर्ता सुरपतेः सहाय्यतां कृतवांस्तस्मिन्समये त्वां गृहीत्वैव स ग तवान् ।

पाठ २५

संजय उवाच।

वर्तमाने तथा युद्धे क्षत्रियाणां निमज्जने।
गाण्डीवस्य महाघोषः श्रूयते युधि मारिष॥ १॥

म० भा० कर्णपर्व अ० ५३

अन्वयः—हे मारिष! तथा क्षत्रियाणां निमज्जने युद्धे वर्तमाने युधि गाण्डीवस्य महाघोषः श्रूयते।

अर्थ— हे धृतराष्ट्र! उस प्रकार क्षत्रियोंका नाश करने वाला युद्ध सुरू होनेके पश्चात् उस युद्धमें गाण्डीव धनुष्यका बडा शब्द सुनाई दिया।

संशप्तकानां कदनमकरोद्यत्र पाण्डवः।
कोसलानां तथा राजन्नारायणबलस्य च॥ २॥

अन्वयः—हे राजन्! यत्र पाण्डवः संशप्तकानां कोसलानां तथा नारायणबलस्य च कदनं अकरोत्।

अर्थ— हे राजा! जहां पाण्डव अर्जुन संशप्तक सैन्य, कोसल सेना और नारायणीय दलका नाश करता था।

संशप्तकास्तु समरे शरवृष्टीः समन्ततः।
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः॥ ३॥

अन्वयः— जयगृद्धाः प्रमन्यवः संशप्तकाः तु समरे पार्थमूर्ध्नि शरवृष्टीः अपातयन्।

अर्थ— विजयप्राप्तीकी इच्छा करनेवाले क्रोधसे भरे संशप्तकवीर तो उस युद्धमें पृथापुत्र अर्जुनके सिरपर बाणोंकी वृष्टि करने लगे ।

ता वृष्टीः सहसा राजंस्तरसा धारयन्प्रभुः ।
व्यगाहत रणे पार्थो विनिघ्नन्रथिनां वरान् ॥ ४ ॥

अन्वयः—हे राजन् ! सहसा ताः वृष्टीः धारयन् तरसा च रथिनां वरान् विनिघ्नन् प्रभुः रणे व्यगाहत ।

अर्थ—हे राजन् ! साहससे उस बाणवृष्टिका धारण करता हुआ और रथियोंमें श्रेष्ठ शत्रुके वीरोंको मारता हुआ वीर पार्थ अर्जुन युद्धमें घूमने लगा ।

विगाह्य तद्रथानीकं कङ्कपत्रैः शिलाशितैः ।
आससाद ततः पार्थः सुशर्माणं वरायुधम् ॥ ५ ॥

अन्वयः—तत् रथानीकं विगाह्य, ततः पार्थः वरायुधं सुशर्माणं शिलाशितैः कङ्कपत्रैः आससाद ।

अर्थ— उस रथसेनामें प्रविष्ट होकर, पश्चात् पृथापुत्र अर्जुन उत्तम आयुधोंको धारण करनेवाले सुशर्माके साथ शिलापर घिसे कंकपत्र बाणोंसे युद्ध करनेके लिये गये ।

स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थे बाणैः समार्पयन् ॥ ६ ॥

अन्वयः- स रथिनां वरः तस्य शरवर्षाणि ववर्ष, तथा संशप्तकाः च एव पार्थं बाणैः समार्पयन् ।

अर्थ—उस रथियोंमें श्रेष्ठने उसपर बाणोंकी वृष्टि की तथ संशप्तक वीरोंने भी अर्जुनपर बाण चलाना आरंभ किया ।

सुशर्मा तु ततः पार्थं विध्वा दशभिराशुगैः ।
जनार्दनं त्रिभिर्बाणैरहनद्दक्षिणे भुजे ॥ ७ ॥

अन्वयः--ततः सुशर्मा तु पार्थं दशभिः आशुगैः विध्वा जनार्दनं दक्षिणे भुजे त्रिभिः बाणैः अहनत् ।

अर्थ- पश्चात सुशर्माने तो अर्जुनपर दश बाण मारकर, श्रीकृष्णको दक्षिण भुजापर तीन बाण मारे ।

ततोऽपरेण भल्लेन केतुं विव्याध मारिष ।
स वानरवरो राजन्विश्वकर्मकृतो महान् ॥ ८ ॥
ननाद सुमहानादं भीषयाणो जगर्ज च ।

अन्वयः-हे मारिष ! ततः अपरेण भल्लेन केतुं विव्याध, हे राजन् ! स महान् विश्वकर्मकृतः वानरवरः भीषयाणः सुमहानादं ननाद जगर्ज च ।

अर्थ— हे धृतराष्ट्र ! पश्चात् दूसरे भल्लबाणसे ध्वजाका वेध किया, हे राजन् ! तब वह बडा विश्वकर्माका बनाया वानरश्रेष्ठ डराता हुआ शब्द करने लगा और वेगसे गर्जने लगा ।

पाठ २६

संधि किये हुए वाक्य।

हे मारिष ! तथा क्षत्रियाणां निमज्जने युद्धे वर्तमाने युधि गाण्डीवस्य महाघोषः श्रूयते। हे राजन्! यत्र पाण्डवः संशप्तकानां कोसलानां तथा नारायणबलस्य च कदनमकरोत्। जयगृद्धाः प्रमन्यवः संशप्तकास्तु समरे पार्थमूर्ध्नि शरवृष्टीरपातयन्। हे राजन्! सहसा ता वृष्टीर्धारयन्तरसा च रथिनां वरान्विनिघ्नन्प्रभुः पार्थो रणे व्यगाहत। तद्रथानीकं विगाह्य ततः पार्थो वरायुधं सुशर्माणं शिलाशितैः कङ्कपत्रैराससाद। स रथिनां वरस्तस्य शरवर्षाणि ववर्ष, तथा संशप्तकाश्चैव पार्थं बाणैः समार्पयन्। ततः सुशर्मा तु पार्थं दशभिराशुगैर्विध्वा, जनार्दनं दक्षिणे भुजे त्रिभिर्बाणैरहनत्। हे मारिष ! ततोऽपरेण भल्लेन केतुं विव्याध, हे राजन्! महान्विश्वकर्मकृतो वानरवरो भीषयाणः सुमहानादं ननाद जगर्ज च ॥

समास।

क्षत्रियः– क्षतात् त्रायते इति क्षत्रियः। (दुःखसे मुक्त करनेवाले)

वर्तमान– वर्तते तत् वर्तमानं। (जो है)

नारायणबलं–नारायणानां बलं। (नारायणोंका बल)

जयगृद्धाः- जये गृद्धा जयगृद्धाः । (जयकी इच्छा-
वाले)

प्रमन्यवः-प्रकर्षेण मन्युः येषां ते प्रमन्यवः। (बडे
क्रोधवाले)

पार्थमूर्धा-पार्थस्य मूर्धा पार्थमूर्धा। (अर्जुनका सिर)

शरवृष्टि-ःशराणां वृष्टिः शरवृष्टिः । (बाणोंकी वृष्टि)

पार्थः-पृथायाः अपत्यं पुमान् पार्थः। (कुन्तीका पुत्र)

आशुगः — आशु गच्छतीत्याशुगः । (शीघ्र
चलनेवाला)

विश्वकर्मकृतः-विश्वकर्मणा कृतः विश्वकर्मकृतः।
(विश्वकर्मासे बनाया हुआ)

वानरवरः-वानरेषु वरः वानरवरः । (बन्दरोंमें श्रेष्ठ)

भीषयाणः- भीषयतेऽसौ भीषयाणः । (भय
देनेवाला)

सुमहानादं-महांश्च असौ नादश्च महानादः। शो-
भनः महानादः सुमहानादः। (अच्छा बडा नाद)

रथी-रथोऽस्यास्तीति । (रथमें बैठनेवाला)

रथानीकं-रथानां अनीकं। (रथसेना)

जनार्दनः—जनं (जन्म) अर्दयति इति । (जन्मका
नाश करनेवाला अर्थात् मुक्ति देनेवाला)

पाठ २७

कपेस्तु निनदं श्रुत्वा सन्त्रस्ता तव वाहिनी ।
भयं विपुलमाधाय निश्चेष्टा समपद्यत ॥ ९ ॥

म० भा० कर्ण० अ. ५३

अन्वयः-कपेः तु निनदं श्रुत्वा तव वाहिनी संत्रस्ता विपुलं भयं आधाय निश्चेष्टा समपद्यत ।

अर्थ— वानर का घोर शब्द सुनकर तेरी सेना भयभीत होगयी । बहुत भय धारण करके चेतनारहित होगई ।

ततः सा शुशुभे सेना निश्चेष्टावस्थिता नृप ।
नानापुष्पसमाकीर्णं यथा चैत्ररथं वनम् ॥ १० ॥

अन्वयः—हे नृप ! ततः निश्चेष्टा अवस्थिता सा सेना शुशुभे, यथा नानापुष्पसमाकीर्णं चैत्ररथं वनम् ॥

अर्थ— हे राजा ! नंतर चेष्टारहित खडी हुई वह सेना वैसी शोभने लगी, जैसा नाना प्रकारके पुष्पोंसे युक्त चैत्ररथ नामक वन शोभायमान होता है ।

प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम ।
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ॥ ११ ॥

अन्वयः—हे कुरुसत्तम ! ततः ते योधाः संज्ञां प्रतिलभ्य बाणैः अर्जुनं सिषिचुः, जलदाः पर्वतं इव ।

अर्थ– हे कुरुश्रेष्ठ ! नंतर वे वीर चेतनाको प्राप्त करके बाणोंको अर्जुनपर वर्षाने लगे, जैसे मेघ पर्वतपर वृष्टि करते हैं ।

परिवव्रुस्ततः सर्वे पाण्डवस्य महारथम् ।
निगृह्य तं प्रचुक्रुशुर्वध्यमानाः शितैः शरैः ॥१२॥

अन्वयः– ततः सर्वे पाण्डवस्य महारथं परिवव्रुः । शितैः शरैः वध्यमानाः तं निगृह्य प्रचुक्रुशुः ।

अर्थ— पश्चात् सब वीरोंने अर्जुनके महारथको चारों ओरसे घेर लिया । तीक्ष्ण बाणोंसे पीडित होकर वे वीर उसको पकडकर कोलाहल करने लगे ।

ते हयान्रथचक्रे च रथेषां चापि मारिष ।
निग्रहीतुमुपाक्रामन्क्रोधाविष्टाः समन्ततः ॥१३॥

अन्वयः— हे मारिष ! ते क्रोधाविष्टाः हयान्, रथचक्रे च, रथेषां च अपि, समन्तात् निग्रहीतुं उपाक्रामन् ।

अर्थ— हे धृतराष्ट्र ! वे क्रोधसे युक्त होकर घोडोंको, रथके चक्रोंको, और धूरीको भी चारों ओरसे पकडने लगे ।

निगृह्य तं रथं तस्य योधास्ते तु सहस्रशः ।
निगृह्य बलवत्सर्वे सिंहनादमथानदन् ॥ १४ ॥

अन्वयः— ते तु सहस्रशः योधाः तस्य तं रथं निगृह्य, सर्वे बलवत् निगृह्य अथ सिंहनादं अनदन् ।

अर्थ—वे तो हजारहां वीर उसके उस रथको पकड कर, सब बलसे पकडकर पश्चात् सिंहनाद करने लगे ।

अपरे जगृहुश्चैव केशवस्य महाभुजौ ।
पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा ॥ ५ ॥

अन्वयः—अपरे केशवस्य महाभुजौ जगृहतुः । हे महाराज ! अन्ये रथस्थं पार्थं मुदा जगृहतुः ।

अर्थ—दूसरोंने केशवकी बडी भुजाओंको पकडा, हे महाराज ! अन्योंने रथमें रहनेवाले पृथापुत्र अर्जुनको आनंदसे पकड लिया ।

केशवस्तु ततो बाहू विधुन्वन्रणमूर्धनि ।
पातयामास तान्सर्वान्दुष्टहस्तीव हस्तिपान्॥१६॥

अन्वयः— केशवः तु ततः बाहू विधुन्वन् रणमूर्धनि तान् सर्वान् पातयामास दुष्टहस्ती हस्तिपान् इव ।

अर्थ—केशवने तो पश्चात् बाहुओंको झटका देकर युद्धभूमिमें उन सबको गिरा दिया, जिस प्रकार दुष्ट हाथी माहुतोंको गिराता है ।

पाठ २८

संधि किये हुए वाक्य ।

कपेस्तु निनदं श्रुत्वा तव वाहिनी सन्त्रस्ता। विपुलं भयमाधाय निश्चेष्टा समपद्यत। हे नृप! ततो निश्चेष्टावस्थिता सा सेना शुशुभे, यथा नानापुष्पसमाकीर्णं चैत्ररथं वनम्। हे कुरुसत्तम! ततस्ते योधाः संज्ञां प्रतिलभ्य बाणैरर्जुनं सिषिचुर्जलदाः पर्वतमिव। ततः सर्वे पाण्डवस्य महारथं परिवव्रुः। शितैः शरैर्वध्यमानास्तं निगृह्य प्रचुक्रुशुः। हे मारिष! ते क्रोधाविष्टा हयान्रथचक्रे च रथेषां चापि, समन्तान्निग्रहीतुमुपक्रामन। ते तु सहस्रशो योधास्तस्य तं रथं निगृह्य, सर्वे बलवन्निगृह्याथ सिंहनादमनदन्। अपरे केशवस्य महाभुजौ जगृहतुः। हे महाराज! अन्ये रथस्थं पार्थं मुदा जगृहतुः। केशवस्तु ततो बाहू विधुन्वन्रणमूर्धनि तान्सर्वान् पातयामास दुष्टहस्ती हस्तिपानिव ॥

समास ।

सन्त्रस्ता- सम्यक्त्रस्ता संत्रस्ता। (बहुत पीडित)
निश्चेष्टा-निर्गता चेष्टा यस्याः सा निश्चेष्टा (चेष्टारहित)
नानापुष्पसमाकीर्ण- नानाविधैः पुष्पैः समाकीर्णम्
(अनेक जातिके पुष्पोंसे युक्त)

कुरुसत्तमः—अतिशयेन सन् सत्तमः, कुरुषु सत्तमः कुरुसत्तमः। (कुरुकुलोत्पन्न लोगोंमें अति उत्तम)

महारथः—महान् च असौ रथश्च महारथः। (बडा रथ)

जलदाः— जलं ददाति ते जलदाः। (मेघ)

सिंहनादः— सिंहवत् नादः सिंहनादः। (सिंहके समान शब्द)

क्रोधाविष्टाः— क्रोधेन आविष्टाः। (क्रोधयुक्त)

रणमूर्धनि— रणस्य मूर्धनि। (रणभूमिमें)

दुष्टहस्ती— दुष्टश्चासौ हस्ती च। (दुष्ट हाथी)

हस्तिपाः—हस्तिनः पांति ते। (हाथियोंके पालक)

संधि किये वाक्य।

जामदग्न्येन रामेण युधि क्षत्रिया निर्जिताः। ब्रह्मतेजसाऽगस्त्येनागाधः समुद्रः पीतः। तस्मात्सर्वेऽत्र ब्रुवन्तु "एष महान् बटुर्धनुः शीघ्रमारोपयतु वै"। द्विजर्षभास्तथेत्यूचुः।

तदा तस्मै ब्राह्मणाय कन्यां दित्सति नृपेऽन्योन्यमालोक्य महीपानां क्रोध आसीत्। अस्मान्संगतांस्तृणीकृत्यातिक्रम्य चायं योषितां वरां द्रौपदीं विप्राय दातुमिच्छति। इह वृक्षमवरोप्य तु फलकाले निपात्यते। योऽस्मान्न मन्यते। एनं दुरात्मानं निहन्मः।

धृतराष्ट्र उवाच ।

सुदुष्करमिदं कर्म कृतं भीमेन सञ्जय ।
येन कर्णो महाबाहू रथोपस्थे निपातितः ॥ १ ॥
कर्णो ह्येको रणे हन्ता पाण्डवान्सृञ्जयैः सह ।
इति दुर्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः ॥ २ ॥
पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे ।
ततः परं किमकरोत्पुत्रो दुर्योधनो मम ॥ ३ ॥

म० भा० कर्ण० अ० ५१

अन्वयः— हे सञ्जय ! इदं दुष्करं कर्म भीमेन कृतम् । येन महाबाहुः कर्णः रथोपस्थे निपातितः । हे सूत ! हि एकः कर्णः सृञ्जयैः सह पाण्डवान् हन्ता इति दुर्योधनः मां मुहुर्मुहुः प्र·अब्रवीत् । भीमेन संयुगे तु राधेयं पराजितं दृष्ट्वा ततः परं मम पुत्रः दुर्योधनः किं अकरोत् ?

अर्थ— हे संजय ! यह कठिन कर्म भीमने किया । जिसने महाबाहु कर्णको रथके उपस्थ भागमें गिरा दिया । हे सूत ! क्योंकि अकेला कर्णही सृञ्जयोंके सहित पाण्डवोंका नाश करनेवाला है, यह बात दुर्योधनने मुझे बारं कही थी । भीमने युद्धमें तो राधापुत्र कर्णको पराजित किया देखकर पश्चात् मेरे पुत्र दुर्योधनने क्या किया ?

संस्कृत-पाठ-माला।

चोवीस पुस्तकोंका मू० ६॥) और डा० व्य० ॥=) बारह पुस्तकों का मूल्य ४) और डा.व्य. ॥) प्रति भागका मूल्य ।=) छः आने और डा. व्य. -) एक आना। अत्यंत सुगम रीतिसे संस्कृत भाषाका अध्ययन करनेकी अपूर्व पद्धति।

इस पद्धतिकी विशेषता यह है—

१ प्रथम द्वितीय और तृतीय भाग। इन भागोंमें संस्कृतके साथ साधारण परिचय करा दिया गया है।

२ चतुर्थ भाग। इस चतुर्थ भागमें संधिविचार बताया है।

३ पंचम और षष्ठ भाग। इन दो भागोंमें संस्कृतके साथ विशेष परिचय कराया है।

४ सप्तम से दशम भाग। इन चार भागोंमें पुलिंग, स्त्रीलिंग और नपुंसलिंगी नामोंके रूप बनानेकी विधि बताई है।

५ एकादश भाग। इस भागमें "सर्वनाम" के रूप बताये हैं।

६ द्वादश भाग। इस भागमें समासोंका विचार किया है।

७ तरहसे अठारहवें भाग तकके ६ भाग। इन छः भागोंमें क्रियापदविचार की पाठविधि बताई है।

८ उन्नीससे चौवीसवें भागतकके ६ भाग। इन छः भागोंमें वेदके साथ परिचय कराया है।

अर्थात् जो लोग इस पद्धतिसे अध्ययन करेंगे उनको अल्प परिश्रमसे बडा लाभ हो सकता है।

मंत्री-स्वाध्याय-मंडल, औंध (जि० सातारा.)

मुद्रक तथा प्रकाशक—श्री० दा० सातवळेकर,
भारत-मुद्रणालय, औंध, (जि० सातारा.)